॥ ॐ अर्हम् ॥

श्रीखरतरगणावतंसकमहाकविश्रीजयानन्दसूरिविरचितम्

श्रीधन्यचरित्रम् (पद्यम्)

॥ श्रीश्रुतदेव्यै नमः ॥

श्रेयोलतामण्डनमण्डपश्री–शाखाचतुर्दिक्परिपूरिताशः । श्रीआदिदेवप्रथितप्रवृद्धि–र्भूयात् फलर्द्ध्यै जिनधर्मवृक्षः ॥ १ ॥ यथा द्रुषु स्वर्गितरुर्गरीयान्, यथाऽद्रिषु स्वर्णगिरिर्गरिष्ठः । यथाऽब्धिषु क्षीरपयोधिरिष्ट–स्तथा पुमर्थेषु चतुर्षु धर्मः ॥ २ ॥ धर्मेण लक्ष्मीरसमा समेति, धर्मेण सम्पत्सुखमप्यखर्वम् । धर्मेण मोक्षोऽपि भवेदनन्तो, यतोऽस्ति धर्मोऽत्र जयस्ततोऽपि ॥३॥ स धर्म एव प्रथितश्चतुर्धा, जिनेश्वरैर्भास्वरगीर्भिरेभिः । सदानशीलोग्रतपःसुभावैः, प्रभावसम्भावितभाविभद्रः ॥ ४ ॥ तत्रापि दानं प्रथमं प्रथीयः, प्रदिष्टमुत्कृष्टफलप्रदायि । येनाऽऽदिदत्तेन मुनौ सुपात्रे–ऽजनिष्ट धन्योऽद्भुतशालिभद्रः ॥५॥ ध्यात्वा परं ज्योतिरनन्तदेहं, प्रणम्य सम्यग् जिनवर्धमानम् । गिरां प्रभावाद् गुरुगौतमस्य, ब्रुवेऽत्र धन्यस्य कथाप्रबन्धम् ॥६॥ धन्यः स पुण्यैरतुलो गुणौघै–रहं तु किञ्चिज्ज्ञतया

सचेतः । तद्दानधर्मोऽतिशयात् तथापि, स्वसाम्यशुद्ध्यै किमपि ब्रुवेऽतः ॥७॥ यः पात्रदाने रसिकः स्वशक्त्या, स सौख्यपात्रं हि यथा स धन्यः । यस्यास्य तापेन सुदुःखिनः स्यु—र्धन्याग्रजा दानकृतोऽपि यद्वत् ॥ ८ ॥

तत्राऽस्ति मगधाख्येऽत्र—सुप्रतिष्ठाप्रतिष्ठितम् । प्रतिष्ठानपुरं स्वस्ति, स्वस्तिसुरथं महर्द्धिमत् ॥ ९ ॥ यत्र दुर्गे परैर्दुर्गे, खातिका परखातिका । वनानि परितः सन्ति, नन्दनानीव सत्फलैः ॥१०॥ मन्दिरैरभ्रंलिहैः शुभ्रैः, पताकापक्षपक्ष्मलैः । यत् पुरं राजते राजहंसैरिव सरोवरम् ॥ ११ ॥ यत्र दानी जनो नाऽगो, याचकालिप्रमोददः । दारिद्र्यं गहनं भिन्ते, हस्तविस्तारकारकः ॥ १२ ॥ लक्ष्यभेदोल्लसद्बाण—गुणचिन्ताविचारवित् । राज्ञि दैवे च सर्वज्ञे, विजयी धार्मिको जनः ॥ १३ ॥ इत्याद्यनेकसच्छ्लोक—सुविवेकनिकेतनम् । स्वर्भूर्भुवस्त्रयीसार—शोभाप्राग्भारभासुरम् ॥ १४ ॥ जितशत्रुर्नृपस्तत्र, नामतः परिणामतः । न्यायवल्लीवनाम्भोदसोदरः सुन्दरः श्रिया ॥ १५ ॥ यद्भुजस्तम्भसम्बद्धा, जयश्रीर्हस्तिनीसमा । नान्यतो याति कुत्रापि, विचित्रेऽपि नृपाङ्गणे ॥ १६ ॥ यत्प्रतापसहस्रांशु—श्चित्रं समुदितो रणे । रात्रौ दिवाऽपि विद्वेषि—ध्वान्तविध्वंसमातनोत् ॥ १७ ॥

पुरा श्रिया श्रितं देवा—न्निःश्रीकं संश्रितं श्रिया । कुतश्चिन्नगरादागात्, तद् द्रङ्गं कुलमेककम् ॥ १८ ॥ सिंहः सत्पुरुषः श्ये(स्वे)न, यत्रेयात् तत्र चार्धति । काकः कपोतः कुपुमान्, जन्मभूमिं न मुञ्चति ॥ १९ ॥ तत्कुटुम्बनरा नार्यः, कर्म कृत्वाऽन्यवेश्मसु । आजीविकां प्रकुर्वन्ति, निर्वहन्ति यथा तथा ॥२०॥ तस्यैको दारकः सार—शारदाशा विनीतधीः । स्वभावेन गुणोदात्तचित्तो मातुः प्रियङ्करः ॥ २१ ॥ जनन्या जनितोत्साहो, महाहितमतिस्ततः । वृत्तये वत्सरूपाणि, चारु चारयति स्वयम् ॥ २२ ॥

एकदा बहिरुद्याने, वत्सचारणकारणात् । निरगो निरगाद् गेहात्, प्रातरुत्थाय सत्वरम् ॥ २३ ॥ तत्रैवोद्यानिकां कर्तुं, लघु-

वृद्धोऽपि दुर्जनः । खाम(स्वक)-पानसमायुक्तो, वने यातो मुनस्त्यथ ॥२४॥ तं दृष्ट्वा बालकः सोऽपि, रोपितेहो गृहं ययौ । क्षुत्क्षुब्धस्य-
मुरकण्ठं, मातरं प्रत्यरं जगौ ॥ २५ ॥ हे मातरद्य सद्यस्कं, परमान्नं सुधासमम् । देहि मे मुदि सम्पाद्य, जेमामि रुचितं यतः ॥२६॥
अद्यपूर्वं त्वया मेऽम्ब !, कम्बले बिभ्रते(तः) सतौ । सुभोजनप्रदानेन, नैषाऽऽशाऽपूरि भूरिशः ॥ २७ ॥ ततः शुद्धमिदानीय, कम-
नीय(यं) सुभोजनम् । देहि मे देहि मेऽद्य त्वं, प्राणा अक्षमाः खलु ॥२८॥ इति श्रुत्वा प्रियालाप-कलापं स्वसुतस्य सा । मनसा
स्वौरसस्नेह-गेहदेहत्यभृत् प्रभूः(भूः) ॥२९॥ एतच्च चिन्तयामास, सनिःश्वासमसंशयम् । धिग् दुर्दैवं यतो नैवं, सुतस्याप्युषितं चिरम्
॥ ३० ॥ चौरश्चैल्लुकः सर्पः, प्राघुणो दुर्जनो भिषक् । वेश्या धूर्तो नृपो नैते, परपीडां विजानते ॥३१॥ इति लोकोक्तिरुक्ता-
ऽभूत्, सत्या सत्यापनादिव । न ग्रहं बालको जह्यात्, किं कुर्वे सर्वथा वृथा ? ॥ ३२॥ इति श्रुत्वा पुराभूत-सुखस्मृतिकृतेऽसुखम् ।
माता रुरोद रोदास्पृक्, बालोऽपि खलु बाल्यतः ॥३३॥ श्रुत्वेति प्रीतः(प्रातिः)वेश्मिभ्यो, वाक्यपीयूषचन्द्रिकाः । मिलित्वा प्रीणयामा-
सु-श्चकोरीमिव तां वत ॥ ३४ ॥ दीनं हीनं जनं दृष्ट्वा, यस्य स्याद् हृदये दया । सर्वक्लेशोपशमकर्म-स्तच्चित्ते वरिवर्ति वै ॥ ३५ ॥ स्व-
सुखदुःखितः प्रायः, सर्वो भवति मानवः । परदुःखसुदुःखार्तो, विरलस्तु दयालुहृत् ॥३६॥ सा दुःखकारणं ताभिः, पप्रच्छे वत्सले-
च्छया । प्रायशः सज्जनोऽन्यस्य, दुःखच्छेदं चिकीर्षति ॥ ३७ ॥ तत्पृष्टेऽथ यथास्पष्टं, तया निजगदे निजम् । मित्रस्वजनवर्गेषु,
सत्यमेव वचः श्रिये ॥ ३८ ॥ सत्येन जायते प्रीतिः, प्रतीतिश्चापि सत्यभृः । जाजायते यशःस्फीति-स्तस्मात् सत्यं सतां मतम्
॥ ३९ ॥ सत्यसन्तुष्टचित्ताभि-स्ताभिः सर्वाभिरादरात् ॥ बभाषे सा विशेषेण, स्नेहप्रेमपुरस्सरम् ॥ ४० ॥ हे सख्यः ! अद्यतो
तावद्, बालको याचते तु माम् । क्षीरान्नं तत् कथं दद्या-मद्य दुर्गे स्वसद्मनि ? ॥ ४१ ॥ श्रुत्वेति ताभिः सर्वाभि-र्बभाषे

सा सखी सुखम् । वयं ते पूरयिष्यामः, सुखं सखि ! सुतेप्सितम् ॥ ४२ ॥ इत्युदित्वैकया दुग्धं, तन्दुलौघो द्वितीयया ।
घृतं त्वपरया लब्धा, चतुर्थ्या प्रमुदा ददे ॥४३॥ त्यक्त्वा खेदं समानीय, सर्वं सर्वस्वसंनिभम् । राद्धमिद्धं सुधास्वादु, परमान्नं
तदा मुदा ॥ ४४ ॥ संस्कृत्य पायसं माता, पुत्रप्रेमपुरःसरा । जहर्ष सूनुरप्याशु, राद्धे वर्णापने यतः ॥ ४५ ॥ विशालस्थालमा-
नीय, संस्थाप्य स्वसुताग्रतः । परिवेष्यापि तन्माता, कार्यायान्यगृहानगात् ॥ ४६॥ रङ्को रत्नं यथा प्राप्य, पिपासुस्तु सरोजलम् ।
तद्वत् क्षीरान्नमासाद्य, मुमुदे बालकोऽधिकम् ॥४७ ॥ प्राक्तनागण्यपुण्येन, कथञ्चित् कर्मलाघवात् । दित्सा वत्साऽऽशये जाता,
बोधिबीजानुबन्धभूः ॥ ४८ ॥ इतश्च कैश्चित् सुकृतैः, प्राक्कृतैस्तस्य मन्दिरे । कश्चिन्मुनिर्महात्माऽऽगा-न्मासक्षपणपारणः ॥ ४९ ॥
तं दृष्ट्वाऽनभ्रवृष्ट्याभं, निष्पुष्पफलवत् फलम् । अदभ्रं सम्भ्रमं बिभ्र-दुत्तस्थौ स तु सम्मुखम् ॥ ५० ॥ भक्तिप्राग्भार-
सम्भार-स्फुरद्रोमाञ्चकञ्चुकः । स त्रिः प्रदक्षिणीकृत्य, तं ननाम स्वकामतः ॥ ५१ ॥ चेतसा चिन्तयामास, धन्योऽहं मद्गृहं
महत् । मद्भिसपुसमं चैत[द्], यतोऽसौ सङ्गतो यतिः ॥५२॥ दुर्लभं चित्तमेकस्य, वित्तं चान्यस्य कस्यचित् । चित्तं वित्तं च पात्रं
च, धन्यानामेकतो मिलेत् ॥५३॥ ध्यात्वेति ध्यानसंहृष्टः, त्यागायोत्पन्नवासनः । पाणिभ्यां पायसस्थाल-मालम्ब्येदमवग् वचः
॥५४॥ हे मुने ! समतासिन्धो !, विश्वबन्धो ! दयानिधे ! । विधेहि मयि सौम्यां त्वं, दृष्टिं वृद्धि(ष्टि) सुधाश्रियाम् ॥ ५५ ॥
त्वत्सम्भावितमात्मानं, मन्येऽहं जगदुत्तमम् । सर्वसंसारसारस्य-राज्यलक्ष्म्याः कटाक्षितम् ॥ ५६ ॥ बालोऽप्यहं त्वया दृष्टः, प्रभ-
वैर्ये बलाधिकः । दरिद्रोऽपीन्द्रसादृश्य-सान्द्रमद्रसुरद्रुमः ॥ ५७ ॥ सद्वित्त-चित्त-पात्राणां, संयोगो युगपन्मम । त्रिवेणीसङ्गमो
भूया-न्मनो-वाक्-कायशुद्धये ॥ ५८ ॥ दानं श्रेयस्ततोऽप्यस्य-दानं तत्पायसं पुनः । मुनौ पात्रे सुधा भूयाद्, विशेषाद् वेषव(चित्तं)

त्वयि ॥५९॥ मदर्थं निर्मितं मात्रा, मात्राऽपि कल्पिता तथा । गृहाण पायसं साधो !–ऽनुगृहाण घृणाऽनुगो(णम्) ॥६०॥ एतद्दानतः
सद्यो, निर्निदानमना नु माम् । पवित्रय जगत्त्राण !, रत्नत्रयमयाऽऽत्मना ॥६१॥ त्वं मे माता पिता त्वं मे, बान्धवस्त्वं धवोऽधुना ।
त्वं स्वामी शिवशंगामी, तस्मादादत्स्व धत्स्व माम् ॥६२॥ इत्युदित्वा ददानेऽस्मिन्, शंददाने स्मितस्पृहम् । मुनिः स्वमिव
सत्पात्रं, सत्पात्रे समदीधरत् ॥६३॥ धन्यंमन्यस्त्वसौ बालो–ऽबालोचितमतिस्थितिः । परमान्नं मुनौ भक्त्या, परमानन्दतो
ददौ ॥६४॥ तस्मिन् ददति तद्दाने, मुनौ पात्रोत्तमे तदा । देवा न ववृषुः स्वर्णं, तदद्भुतकृते ध्रुवम् ॥६५॥ तदा तस्मिन्
भवे यत्र, बालो लेभे फलाद्भुतम् । तल्लोके विश्रुता जाता, धर्मो धीर इति श्रुतिः ॥६६॥ विहृत्य निर्गते गेहा–न्मुनावन्वगमत्
स्वकः । मन्वानः सफलं जन्म, तन्महामुनिदानतः ॥६७॥ तद्दानावसरे सारे, भावोदारे स चेतसि । महोत्तममनुष्यायु–र्निबबन्ध
प्रबन्धतः ॥६८॥ गाम्भीर्यं सर्वतः शस्यं, सर्वभावेषु भाविनाम् । विशेषतः शुभे दाने, यदधाद् बालकोऽपि सः ॥६९॥ यद्बभूद्
गेहसर्वस्वं, परमान्नं सुधोपमम् । तद् दत्त्वाऽपि दधौ चित्ते, यथा कोऽपि विवेद न ॥७०॥ कश्चिद् दत्त्वा समर्थोऽपि, किञ्चिद् वक्ति
भृशं जने । कोऽपि दत्त्वा महाभागो, न तद् वक्ति मनागपि ॥७१॥ एवं दत्त्वाऽपि गाम्भीर्या–न्नाऽऽचख्यौ मातुरप्ययम् । ततः सम्भा-
व्यते भव्यै–र्धर्मश्छन्नो महाश्रिये ॥७२॥ समागत्य पुनर्मात्रा, परिवेषितपायसम् । प्रायशो बुभुजे स्निग्ध–मुग्धमुग्धमतर्पितः
॥७३॥ गुरु–देव–पितृ–स्निग्ध–वृद्ध–ग्लानाथनेषु च । दत्त्वा यद् भुज्यते भुक्तं, तच्छेषमुदरे भृतिः ॥७४॥ तस्मिन्नेव दिने सायं,
वत्सरूपाणि चारयन् । बहिर्दृष्ट्वा मुनिं स्पष्ट–मुपविष्टस्तदन्तिके ॥७५॥ धर्मं चतुर्विधं शुद्धं, मुनिनाऽऽदिष्टमित्वरम् । प्रीत्या
शुश्राव विश्रान्तः, कलापीवाब्दगर्जितम् ॥७६॥ वत्सपालस्तदाऽऽकर्ण्य, धर्मकर्मोपशर्मदम् । योगीश परमानन्द–कल्लोलैरा-

प्रमुदोऽभवत् ॥ ७७ ॥ दध्यौ च हृदये धर्मः, धर्महेतुरकृत्रिमः । विश्वबन्धुरहो ! धर्मो, धर्मः कल्याणवल्लिभः ॥ ७८ ॥ भवितव्य-नियोगेन, तदायुः क्षतिमागतम् । विसूचिकावशादाप, परलोकमतर्कितम् ॥ ७९ ॥ यस्मिन् देशे च काले च, यत्र योनि-वयो-रूपे । जीवैर्बद्धं हि यत् कर्म, प्रायस्तत् तत्र भुज्यते ॥ ८० ॥ इत्येवमेव सुकृतं समुपार्ज्य सर्वः, सद्भावदानवशतः स्ववशस्वभावः । तद्गोरमन्दिरमुपेत्य समक्षमक्षैः, पुण्येन सोऽत्र विदधे सविधे समृद्धः ॥ ८१ ॥ तस्मिन् क्षणे तदतुल-पुण्यनैपुण्यभूपतिः । सम-क्षमतनोति स्म, विस्मयस्मेरिणीं दशाम् ॥ ८२ ॥ यो दानपुण्यनैपुण्यं, बालोऽपि बुधवद् दधौ । निर्धनोऽपि धनीशाद्यः दानाद् धन्यो बुधेऽस्तु सः ॥ ८३ ॥ तद्दानपुण्यवशतः शिशुरेष चेष-विलासादिभिर्विरहितोऽपि विलोपयोग्यः । यत् प्राप्स्यतीप्सितसुखं सुषमाविशेषात्, तत् प्रोच्यते समुचितं जिनधर्मयोग्यम् ॥ ८४ ॥ इति धन्यमहापुण्य-नररत्नशिरोमणेः । जिनधर्मजयानन्दः, प्रस्तावः प्रथमोऽजनि ॥ ८५ ॥

इति श्रीधन्यदानचरिते पूर्वभवपरमान्नदानपुण्यार्जनः प्रथमः प्रस्तावः ॥ १ ॥

अथ द्वितीयः प्रस्तावः ।

अथान्नदानोत्थपुण्ययोगात्, समर्जितोदात्तकुलोपयोगात् । स बालजीवोऽवततार यत्र, यथास्वरूपस्तदिहोच्यतेऽत्र ॥ १ ॥ दानाद् भवेज्जन्म कुलेष्वरोगं, सौभाग्यमाप्योन्नतिलाभयोग्यम् । रूपं सुसंयोगफलं यशश्च, सद्बोधिसिद्धिश्च जयो धनश्च ॥ २ ॥ तत्रैव नगरे लक्ष्मी-लीलापुण्याढ्यनागरे । धनसाराभिधः श्रेष्ठी, ज्येष्ठोऽस्ति वणिजां वरः ॥ ३ ॥ लक्ष्मीर्वसति वाणिज्ये, सर्वतो व्यवहारिणाम् । मत्वेति यस्तदेवाधाद् बहुधाऽक्रयाणकैः ॥ ४ ॥ राजहंसीव सत्पक्षा, सन्मानसनिवासिनी । प्रिया शीलम(व)ती तस्य, नामतः परिणामतः ॥ ५ ॥ या देव-गुरु-बन्धूनां, भक्त्या पतिमनोऽनुगा । सर्वकार्यकरी गेहे, सा श्रीरिव दृश्यते ॥ ६ ॥

एवमेव श्रेष्ठि–श्रेष्ठिन्यो–र्गृहवासं वितन्वतोः । प्रयाति सुखतः कालः, परस्परमुपेतयोः ॥ ७ ॥ पुरा पुत्रत्रयं जज्ञे, यथानुक्रमनामकम् ।
स्वस्वभावसमायुक्त–सद्गुणात्मकमेव तत् ॥ ८ ॥ धनदत्ताभिधः पूर्वो, धनदेवो द्वितीयकः । तृतीयो धनचन्द्रश्च, भार्याः सद्भाश्च
ते ॥ ९ ॥ विनयादिगुणोपेता–स्तत्पत्न्योऽपि क्रमादिमाः । धनश्रीर्धनदेवी च, धनचन्द्रा तथाऽपरा ॥ १० ॥ पितृमातृस्वसृ–
भ्रातृ–भ्रातृजायाकुटुम्बके । शालिवत्यां सुतत्वेन, स जीवोऽप्युदपद्यत ॥ ११ ॥ तस्मिन् गर्भे समुत्पन्ने, बहुपुण्ये पुराऽर्जितात् ।
शुभस्वप्नप्रपञ्चेन, माता सन्तोषिता यथा ॥१२॥ सन्निधेः सन्निधेर्धात्री, यथा दृष्टाऽपि तुष्टये । तद्गर्भसत्त्वभृन्माता, साताख्याता-
प्यदीप्सितः ॥ १३ ॥ यस्मिन् दिने प्रियाकुक्षौ, गर्भत्वे सोऽवतीर्णवान् । तद्दिनात् स धनैः श्रेष्ठी, ववृधे पार्थिवद् विधोः ॥ १४ ॥
यथा कल्पतरोर्बीजं, वर्धते नन्दनावनौ । तथाऽसौ वर्धते गर्भे, मातुर्वाञ्छितवत्सलः ॥ १५ ॥ यथाऽन्धकारकक्ष्ये, दीपे गेहं
प्रदीप्यते । मातृगर्भस्थिते तस्मिन् , गृहं माताऽप्यदीप्यत ॥ १६ ॥ दोहदा दानपुण्याद्यौ, बभूवुर्मातुरुत्तराः । ते सर्वे पूरिताः
पित्रा, मिश्रायितमनोरथैः ॥ १७ ॥ गर्भमासान् नवातीत्य, सप्तार्धाष्टमरात्रिकान् । शुभप्रशस्ते दिने वार–धिष्ण्य–योगबलाधिके
॥ १८ ॥ लग्ने ग्रहबलोपेते, केन्द्रगे गुरुभार्गवे । रोहणाद्रिक्षमेवाम्बा सुतरत्नमजीजनत् ॥ १९ ॥ शुभलक्षणसम्पूर्णो, रूपला-
वण्यपुण्यवान् । दीप्तिमानद्भुताकारः, पुत्रो जातः पितुः श्रिये ॥ २० ॥ तज्जन्मनि प्रशस्तानि, निमित्तान्यभवंस्तदा । हर्षप्रकर्षि-
योषित्कं, सञ्जातं सूतिकागृहम् ॥२१॥ निर्धीयमाने तन्नाले, भूमावाचारकारणात् । निःससार महःसार–मणिनिधी रसातना(तला)त्
॥ २२ ॥ तं निधिं तमिवावाप्य, धात्र्या निर्गतमग्रतः । धन्यो धन्योऽयमद्यैव, यो धनेन सहाजनि ॥ २३ ॥ सुत–शेवधिसम्प्राप्ति–
हृष्टचित्ता मिथोऽङ्गनाः । धन्यनामेति निर्माय, जगुस्तं कुलयोषितः ॥ २४ ॥ त्रिभिर्विशेषकम् ॥ अन्योऽपि प्रीतिमाल्लोकः, कुल-

जस्वजनादिकः । चकार सारतबाम्ना, वर्धापनमहोत्सवम् ॥ २५ ॥ निर्वृ(वे)त्य सूतकं रीत्या, द्वादशाहे महामहे । पित्राऽपि तस्य
तन्नाम, सु(स)कुटुम्बमदीयत ॥२६॥ तस्य जन्मोत्सवाद्यास्तु, पितृभ्यां विहिता हिताः । तदाऽकस्माद् धनप्राप्ति-स्तद्भाग्यादभवद् भृशः
॥ २७ ॥ शुक्लपक्षद्वितीयेन्दुः, कलाभिर्वर्धते यथा । सुखस्थः शङ्करोऽप्येवम्, सल्लक्षणविचक्षणः ॥ २८ ॥ सचकोरहृदामोदी,
सन्वन् कुवलयश्रियम् । धिष्ण्यराजिष्णुराशाद्युत्, स धन्योऽपि तथोचकैः ॥ २९ ॥ युग्मम् ॥ स्नेहपानीयसंसिक्तः, सच्छायोपाय-
सन्मयः । शाखीव वर्धते धन्यः, सार्धं पितृमनोरथैः ॥३०॥ क्षौरकर्मादिका जात-क्रियाश्चाचारहेतवः । ताः सर्वास्तस्य पितृभ्यां,
विहिताः सन्महोत्सवाः ॥ ३१ ॥ अथ पञ्चाब्ददेशीयो, विद्यादानार्थमर्थतः । शालायां पण्डितस्यायं, पितृभ्यां विनिवेशितः
॥ ३२ ॥ विनयाद् विद्याः सङ्ग्राह्याः, पुष्कलाद् धनतोऽपि च । विद्यया वा पुनर्विद्या-त्रयमेतत् तदङ्गतः ॥३३॥ गणिताद्याः कलाः
सर्वा बुद्धिसर्वस्वभूमिकाः । द्वासप्ततिरपि स्पष्ट-मधीतास्तेन धीमता ॥ ३४ ॥ विद्याश्चतुर्दश श्रेष्ठाः, षडङ्गाद्या यथाक्रमम् ।
पठितास्ता अपि प्राज्य-विनयात् सुगुरोर्मुखात् ॥ ३५ ॥ यत्र पुण्यं हि तत्र श्री-र्यत्र श्रीस्तत्र धीरपि । यत्र धीस्तत्र युक्ता ह्री-
र्यत्र ह्रीस्तत्र नीरपि ॥ ३६ ॥ यत्र नीस्तत्र वागीशा, यत्र वाक् तत्र सा धृतिः । यत्र श्रेयश्च तत्रैव, गुणाः सर्वे विसृत्वराः ॥३७॥
एवं च भणनात् तस्मिं-ल्लक्षणानि गुणाः पुनः । सङ्क्रान्ताः पूर्वपुण्यत्वात् , पदार्था मुकुरे यथा ॥ ३८ ॥ त्रिभिर्विशेषकम् ॥ स
यदाऽभ्यासविद्योऽभूत् , सकलः कमलालयः । यौवनेनाप्यलञ्चक्रे, शकेनैरावणो यथा ॥ ३९ ॥ रूप-लावण्य-धन्यात्मा, संश्रितो
यौवनश्रिया । ततः सौभाग्यलक्ष्म्याऽपि, सर्वैः पुण्यास्पदेच्छुभीः ॥ ४० ॥ पितृभ्यां स्वजनैर्मेने, स गुणैर्विनयादिभिः । एकेनापि
गुणेनाङ्गी, प्रायः सर्वत्र पूज्यते ॥ ४१ ॥ निष्केवलं गुणा एव, परेष्वपि विजित्वराः । किं पुनर्विनयेनाऽऽप्ताः, शूरा वा गुण-

चक्रिणा ॥ ४२ ॥ आदृत्येति पितृभ्यां स, सत्यग्रेऽपि सुतत्रये । विशेषात् स्वात्मवत् प्रेष्ठः, गुणा मानप्रदाः खलु ॥ ४३ ॥
वृद्धत्वं च लघुत्वं च, नास्ति मानत्वतत्त्वदम् । गुणी लघुरपि श्रेष्ठो, ज्येष्ठोऽपि विगुणो लघुः ॥ ४४ ॥ इति स्थितिमते
सर्व–कुटुम्बे तद्धितावहे । पित्रोरपि सतोरेतद्–बान्धवा द्वेषिणोऽभवन् ॥ ४५ ॥ एकदा पितरावूचुः, प्रचुरेर्ष्यास्तदग्रजाः । समाने
सति सुतुत्वे, किमेष बहु मन्यते ? ॥४६॥ प्रायः पुत्राः समाः सर्वे, पितॄणां हितहेतुतः । अङ्गजत्वाद् भृतत्वाच्च, पोषणादिविशेषणात्
॥ ४७ ॥ एकोदरत्वे तुल्यस्य, लघोरपि सतोऽस्य तु । अत्यादरपुरस्कारः, क्रियते किमु कामतः ? ॥ ४८ ॥ युग्मम् ॥ इति
त्रयाणां पुत्राणां, तेषां धन्याग्रजन्मनाम् । निर्न्यायं वाक्यमाकर्ण्य, जगतुः पितरावथ ॥ ४९ ॥ हे त्रय[ः] पुत्रकास्त्रास्त्र,
निरूपा निर्गुणाः किमु ? । नृत्य यूथपरिभ्रष्ट–गजवद् भञ्जितक्रमम् ॥५०॥ गुणाः सर्वत्र पूज्यन्ते, न वृद्धत्वं न सत्कुलम् । अप्यङ्गजा
मलास्त्याज्या ग्राह्याः सुमनसो वनात् ॥ ५१ ॥ गृहजोऽपि रजःपुञ्जः, क्षिप्यते निर्गुणो बहिः । बहिर्भूर्भवने नेया, खानेर्भूस्त्ना-
ऽपि मङ्गला ॥ ५२ ॥ न कोऽपि वल्लभः काय:(र्ये)–प्रायः स्वार्थपरे जने । गुणवान् वल्लभः सोऽपि, सर्वत्र निजकार्यकृत् ॥ ५३ ॥
निष्कुलोऽपि तथोग्रोऽपि, विरूपाक्षोऽपि भैरवः । रुद्रोऽपि गुणतः पूज्यः, किं पुनस्त्वेष सत्कुलः ? ॥ ५४ ॥ तस्मात् त्वावां गुणानस्य,
पूजयावः परेऽपि च । ततो न कार्यो युष्माभि–र्गुणद्वेषोऽस्य सोदरैः ॥ ५५ ॥ एवं च न्यक्कृता युक्तया, पितृभ्यां तेऽङ्गजाधमाः ।
पुनः किमपि प्रत्यूचु–र्वाचाटास्तादृशाः खलु ॥ ५६ ॥ यद्येवं भवतोरस्मि[न्] निर्बन्ध[ः] स्नेहबन्धुरः । परीक्षा क्रियतां तर्हि, यद्धि
सर्वत्र सम्मतम् ॥ ५७ ॥ गजोऽपि चतुरङ्गोऽपि, पत्तिश्चापि रथस्तथा । मणि–स्वर्णादिकः सर्वः, पदार्थः सुपरीक्षितः ॥ ५८ ॥
परीक्ष्यमाणा ये दक्षैः, क्षमन्तेऽत्र परीक्षितम् । ते तु मन्त्वः सतां मान्या धन्या हि सुपरीक्षिताः ॥ ५९ ॥

इति तेषां वचः श्रुत्वा, युक्तियुक्तमुपस्थितम् । किञ्चिद् विमृश्य पितृभ्यां, यत् कृतं तन्निरूप्यते ॥ ६० ॥
द्वात्रिंशद् रूपका भाग्य-लक्षणश्रीनिरूपकाः । तेभ्यस्ताभ्यां तु पितृभ्यां, वाणिज्याय धियाऽर्पिताः ॥ ६१ ॥
पृथक् पृथग् दिशो गत्वा, कृत्वा च क्रयविक्रयम् । लाभं नो दर्शयध्वं भोः !, इत्युक्त्वा प्रेषिताः सुताः ॥ ६२ ॥
परीक्षाद्रव्यमादत्या-ऽऽगत्य स्थानं य(य)थेप्सितम् । व्यवहर्तुमथो लग्ना व्यवहारो हि कामधुक् ॥ ६३ ॥ धन्योऽपि द्रव्यमासाद्य,
तन्मात्रं पितुरन्तिकात् । जगामोद्यमवी राज-मार्गे वर्णोत्तमोद्यमः ॥ ६४ ॥ प्राक् सजीवे क्रयाणं हि, श्रिये श्रेयं वणिक्सुतैः ।
मत्वेति मेण्ढकं प्रौढं, जग्राहाग्र्यगुणग्रहः ॥ ६५ ॥ लात्वा तं यावदायातो, राजमार्गे समग्रमुत् । राजपुत्रस्ततः कोऽपि, समा-
यातः समेण्ढकः ॥ ६६ ॥ धन्यस्य मेण्ढकं दृष्ट्वा, राजपुत्रस्तमब्रवीत् । योध्येते बुद्धितो मेण्ढौ, परस्परजिगीषया ॥ ६७ ॥
दीनाराणां सहस्रे हि, पणीकृत्य कृतस्पृहम् । राजमार्गजनाध्यक्षं, मेण्ढकौ तावढौकताम् ॥ ६८ ॥ घाताघातप्रपाताय, पृथग् भूत्वा
महोद्धतम् । शीर्षाशीर्षि महामर्षं, युयुधाते तु मेण्ढकौ ॥ ६९ ॥ युध्यमानेन धन्यस्य, मेण्ढकेनोद्धताकृतेः । राजसूमेण्ढको जिग्ये,
भाग्ये हि बलवत्तरम् ॥ ७० ॥ राजाङ्गजस्य तेषेऽथ, मत्सरोऽपि विशेषतः । धन्यो जयं च दीनार-सहस्रे लब्धवान् पणम् ॥ ७१ ॥
तल्लात्त्वोभयमिभ्यात्मा, गृहमागत्य सत्वरम् । ताताय ढौकयामास, सुपुत्रः खलु तादृशः ॥ ७२ ॥ अन्ये तु भ्रातरो भाग्य-वर्जिता
धन्यनिर्जिताः । अलाभस्वल्पलाभत्वा भाग्ययोग्या हि संपदः ॥ ७३ ॥ पुनर्द्वितीयवेलायां, त्रयोऽप्या भ्रातरोऽवदन् । भयः
परीक्षा क्रियतां, श्रेयो द्वित्रिः परीक्षितम् ॥ ७४ ॥ पितृभ्यां पूर्वपुत्रोक्त-माकर्ण्याकीर्णनिर्णयम् । परीक्षार्थं पुनः किञ्चित्, पर्या-
लोचि विचारतः ॥ ७५ ॥ एकस्यां तु परीक्षायां, धन्योऽभूद् धनकामधुक् । द्वितीयस्यां पुनर्भूया-दिष्टार्थप्रथनप्रथः ॥७६ ॥ पुनः

परीक्षार्थीक्षार्थं, पुत्रेभ्यो ददिरे तदा । कल्याणमाषकाः षष्टिः, पितृभ्यां हृष्टपुष्टिदाः ॥ ७७ ॥ तदादाय महापार–क्रय-विक्रय-निष्क-
याम् । चतुर्षूत्रयोऽपि तेऽल्पार्थ–मर्थेच्छा हि नृणां मृषा ॥ ७८ ॥ महोद्यमात् पुनस्तेषां, व्यवहारविहारिणाम् । न कोऽपि लाभः
प्रायोऽभूत्, फलं दैववशं खलु ॥ ७९ ॥ धन्योऽथ पुण्यनैपुण्य–बुद्धिसन्निधिसन्निधिः । यल्लाभमाय शुभं लेभे, तस्यरूपं प्ररूप्यते
॥८०॥ मनःसमाधिमाधाय, विधाय जिनदर्शनम् । प्रणम्य सुगुरूनादौ, स्मृत्वा पञ्चनमस्क्रियाम् ॥८१॥ पित्रोरादेशमासाद्य, निर-
वद्यक्रयाणवित् । शकुनं प्राप्य चतुष्पथे प्राप्तः, स सर्वं सफलं विधेः ॥८२॥ कस्यां च विपणश्रेण्यां, सुपणायाविचक्षणः । चिकीर्षुः क्रेयं
लाभाय, हट्टाग्रे समुपाविशत् ॥ ८३ ॥ इतस्तत्राभवद् द्रङ्गे, तृष्णेच्छो धनमीलने । महाधन्याभिधः श्रेष्ठी, कृपणानां शिरोमणिः
॥ ८४ ॥ तेन कृत्वा महारम्भै, स्तम्भैर्दुर्गतिसद्मनाम् । पाप्मनाऽमाननं येन, तेन द्रव्यसमर्जनम् ॥८५॥ यथा नन्दोऽभवद् राजा,
नव्यद्रव्याद्रिसङ्ग्रही । तथैवास्थित वित्तौघ–सञ्चयोचितचेतनः ॥ ८६ ॥ रात्रिन्दिवं विना स्वापं, प्रायशो भोजनं विना । त्यक्त्वा-
ऽऽलस्यमसौ द्रव्य–कोटीकोटीरतां ययौ ॥ ८७ ॥ पापानि कृपणाः कुर्यु–र्वित्तार्थं स्वार्थनिःस्पृहाः । तदर्जितं धिया धीरा वीराः
कैचन भुञ्जते ॥८८॥ स धर्मायापि नो दत्ते, न कर्मण्यपि च शर्मणि । न नर्मणि च नो दीने, हीनेऽधीने च किञ्चन ॥ ८९ ॥
स्वजने सज्जने वाऽपि, नाऽऽसन्ने न दवीयसि । दुःस्थे सुस्थे प्रशस्तेऽपि, ग्रासमात्रं न यच्छति ॥ ९० ॥ पुत्रस्यापि न कस्यापि,
शत्रोरिव यथा तथा । किञ्चिन्मात्रं न स प्रायो, दित्सति छद्मपिच्छलः ॥ ९१ ॥ न माता न पिता नेष्टो, बन्धुर्नापि न बन्धुरः ।
कृपणस्य न कोऽप्यस्ति, वल्लभो द्रविणाद् भवे ॥ ९२ ॥ नाऽऽत्मा नापि परः कोऽपि, कृपणस्य सुभोज्यभुक् । यो न भुङ्क्ते स्वयं
वृथा–ऽन्यस्मै स कथं ददीत ? ॥९३॥ न वस्त्राणि परीधत्ते, विशेषसुर्वपुषः श्रिये । यैः कृत्वाऽऽलोक्यते लोके, मानसन्मानपूजनम्

॥ ९४ ॥ वार्षिकेऽप्युत्सवे दीपा-ल्यादौ शाल्यादिभोजने । मिष्टान्नमस्य शस्यार्थं, नो विशेषुदरे कदा ॥९५॥ मितम्पचस्य तस्याहो !, सत्यपि द्रविणोच्चये । भोजनाच्छादनेच्छासु, न कदाचिदभूद् वरम् ॥ ९६ ॥ मुखानुकूलताम्बूल-हृदानन्दनचन्दनैः । नासाऽपि नासकौ भेजे, सुविनीतैर्यथा खलः ॥ ९७ ॥ सोऽर्थिभिः प्रार्थ्यमानोऽथ, नामभ्रान्त्या भ्रमभ्रमैः । चोक्षपीति पतस्पीति, शाशपीति विरीतिमत् ॥ ९८ ॥ चेतसा चिन्तयन् मूचे, भूतेजोभञ्जकं वचः । गालिभिर्गालनीयोऽहं, न च याच्यस्तु याचकैः ॥ ९९ ॥ यो मां शुचिभिरहन्यात्, स तु शान्तो [illegible] । क च याचकवाचाऽस्तु, वज्रपातोपमक्रमः ॥ १०० ॥ जातजन्मोत्सवे प्रायो, मार्ग्यमाणः स मार्गणैः । मार्गणैरिव भिन्नात्मा, रोरवीति खरस्वरम् ॥ १०१ ॥ किं बह्वन्यमपि प्रातिवेश्मिकं स्वजनादिकम् । कस्मैचिद् ददतं वीक्ष्य, वीक्षाऽऽपन्नो भवत्यजम् ॥१०२॥ दीने हीने क्वचिद् दीप-माने दाने तु दानिना । शिरोऽर्त्तिर्जायते तस्य, वराकस्यास्य पश्यतः ॥ १०३ ॥ ऐहिकाऽऽमुष्मिकानर्थ-सार्थे निःशङ्कसङ्करः । अशोभलोभसंक्षोभ-स्तोमदौर्भाग्यभोगभूः ॥ १०४ ॥ दाध्येति ध्यानसन्धान-विध्याताध्यात्मचेतनः । तद्धनो निर्धनो वाऽन्ध-स्त्रिसन्ध्यं धनमिध्यधीः ॥१०५॥ युग्मम् । एवं च कुर्वतस्तस्य, तद्धनस्य धनाशया । धने धनेऽपि वृद्धत्व-माससादाऽऽपदां पदम् ॥ १०६ ॥ पुत्र-पौत्रादिविद्वेषा-दन्यदा स हृदा न्यदात् । तथा धनं निधीकुर्वे, यथा कोऽपि न विन्दति ॥ १०७ ॥ इति ध्यात्वा सूत्रं खात्वा, कृत्वा गर्त्तं गृहान्तरे । द्रव्येण पूरयामास, रजो नीत्वाऽऽत्मसम्मुखम् ॥१०८॥ यदा तु कृपणो धात्र्या, विदार्योदरमादरात् । धनं क्षिपति रक्षार्थं, धूलिमात्मसुखं नयन् ॥१०९॥ तदा तद्गर्त्तेश्वचास्यं, प्रसार्यार्यैसम्मदात् । कम्मणीति धनं मेऽद्यो, धूलिर्वक्त्रे तवास्तु भोः ! ॥ ११० ॥ तथाऽन्तःशुषिरां खट्वा-मपट्कट्चेष्टितः । बभार सारविस्तार-प्रत्नरत्नोऽथ यत्नतः ॥ १११ ॥

गर्त्तामापूर्य यत्नेनो–परि खट्वां निधाय ताम् । तदेकाग्रमनास्तत्र, तस्थावस्थानकस्थितिः ॥ ११२ ॥ तत्पर्यङ्कासनासीनो, मूर्च्छास्त(स्त)मितलोचनः । दाध्याति ध्यानदानेतद्, योगीव परमक्षरम् ॥ ११३ ॥ यदीदृग् निश्चलं चेतो, जन्तोः सन्तोषतो भवेत् । शुभार्थं तत् तदैवाशु, कैवल्यमवलम्बते ॥ ११४ ॥ प्रायोऽन्यस्यापि जीवस्य, द्रव्यादिविषये मनः । यादृशं तादृशं चेत् स्याद्, धर्मे तत् सुलभं शुभम् ॥ ११५ ॥ " न वेत्त्यसौ वराको यद्, धनं यत्नेन रक्षितम् । समं न केनचिद् याति, भवान्तरमुपेयुषा ॥ ११६ ॥ विना मृतस्य दानेन, धनं रक्षाविधायिनः । किंचिन्मात्रमिहामुत्र, नोपयोगाय जायते ॥ ११७ ॥ " स जराजीर्णसर्वाङ्गो, मुमूर्षुर्मूर्खशेखरः । प्राप पापसमायुक्तो, मोहमौढ्यमनूढवत् ॥ ११८ ॥ समुत्पाटयितुं खट्वां, प्रारेभे क्ष्मां निरीक्षितुम् । तत्पुत्रैर्धनलिप्सायै, दोषमूलं हि सा यतः ॥ ११९ ॥ पाणिभ्यां संस्पृशन् पादौ, पुत्राणां स वदन् मृदु । प्रोचे भो नन्दना ! भैनां, कुड्ड्वं खट्वां मदन्यतः ॥ १२० ॥ प्राणेभ्यो वल्लभा यन्मे, खट्वेयं घटते स्फुटम् । ततो न कार्या दूरेण, पितृभक्तैः सुतैरिति ॥ १२१ ॥ पुनरूचे विचार्यान्तः, कृपणः स्वसुतान् प्रति । समयोचितपाथेयं, दद्ध्वं मह्यं सुता ! हितम् ॥ १२२ ॥ ये भवेयुः पितुर्भक्ता, युक्तास्ते नन्दनाः पुनः । शेषास्तूदर–हृद्दारि–कृमिकीटोत्कटाः स्फुटाः ॥ १२३ ॥ श्रुत्वेति पितुरादिष्ट–मिदं ते मुदितास्तदा । पुण्यं दातुं पितुः पातुं, स्वाख्यातुं स्वविचेष्टितम् ॥ १२४ ॥ ततः स कृपणः प्रोचे, विचिन्त्योचितमात्मितम् । कार्यः संस्कारपुंस्कारो–ऽस्यानया खट्वया समम् ॥१२५॥ इत्युक्ते लोभयुक्ते, पित्रा सत्रा स्वचेतसा । जहृषुः सुपर्म प्रोचु–स्तात ! त्वं निःस्पृहो गृहे ॥ १२६ ॥ सत्यपि स्वापतेयस्य, सारे द्वारे त्वदर्जिते । यदेतदेव देयत्वं, बुभुपुर्याचसे वसु ॥ १२७ ॥ इत्यङ्गीकृतमात्मीय–मुदितं मुदितः पिता । पुत्रांश्चात्र महामात्र–निर्व्ययाभयदानतः ॥ १२८ ॥ प्रायो न कोऽपि कस्यापि, ज्ञानात्यान्त-

रमन्तरम् । पितुर्हर्षः परः कोऽपि, सुतानां तु परः परः ॥ १२९ ॥ यदा यस्यापि कस्यापि, वाञ्छितं स्याच्छुभाशुभम् । तदा तस्य प्रतिश्रुत्या, श्रुत्वा सर्वः प्रमोदते ॥ १३० ॥ यदुक्तं 'मानुषं कूटं, लाकुटं पौल्लयमान्तरम् । प्रायो न ज्ञायते' तथो–भयं सत्यमभूत् तदा ॥ १३१ ॥ प्रायः कार्यो न विश्वासः, स्वस्यान्यस्यापि कस्यचित् । पिताऽपि तापितस्तादृक्, सुता अप्यसुतादृशाः ॥ १३२ ॥ एवं संत्रासितस्यास्य, कृपणस्यायुषः क्षये । पञ्चत्वमासदन् सद्यः, प्राणाः प्रकुपिता इव ॥ १३३ ॥ स सुतै रत्न-तद्यत्नानभिज्ञैस्तदवज्ञया । खट्वायां चाटितो निन्ये, संस्कृत्यै पितृकाननम् ॥ १३४ ॥ याचितायां तु खट्वायां, श्मशानाधिकृतैरिति । कलिः सङ्कलितः कोऽपि, समं तत्स्वजनैस्तदा ॥ १३५ ॥ तज्जनैरन्तरे भूत्वा, कृत्वा कलिनिषेधनम् । सखेपनाऽर्पिता खट्वा, चण्डालानामनादरम् ॥ १३६ ॥ श्मशानेशेन सा खट्वा, शीर्णा जीर्णेति निर्णयात् । विक्रेतुं विपणिश्रेणि–मानिन्ये धन्यपुण्यतः ॥ १३७ ॥ विशेषाद् यत्र धन्योऽस्ति, स्थितः संक्रयणं चिकीः । तत्रागताऽथ साऽदर्शि, धन्येन बुधबुद्धिना(तः) ॥ १३८ ॥ "यतोऽभ्यासवशा विद्या, लक्ष्मीः पुण्यवशा पुनः । दयादानवशा कीर्ति–र्बुद्धिः कर्मवशा तथा ॥ १३९ ॥" ततो बुद्ध्या तकां खट्वां, दृष्ट्वा स्पृष्ट्वा छटाऽम्भसा । सगर्भेत्यवगत्यान्तः, सलक्ष(क्ष्य)त्वादलक्षयत् ॥ १४० ॥ "तृणवल्ल्यावलिच्छन्नं, वृक्षकक्षादिरक्षितम् । बुद्ध्या पश्यन्ति धीमन्तः, काव्यार्थमिव सद्धनम् ॥ १४१ ॥ चरैः पश्यन्ति राजानः, शास्त्रैः पश्यन्ति पण्डिताः । गावो घ्राणेन पश्यन्ति, धिया पश्यन्ति धीधनाः ॥ १४२ ॥" खट्वेयं विक्रया यैषा–सारभारवती सती । हर्षप्रकर्षहेतुश्च, ततोऽर्थ्या रत्नभूरिव ॥ १४३ ॥ तथा च धनिनां गेहे, वस्तु खट्वाऽऽदि सुन्दरम् । निःसावद्यं च सम्पन्नं, ततोऽप्येषा सुखाय मे ॥ १४४ ॥ इति निश्चित्य तत्कालं, शाली धन्यः कलाकलः । देयं दत्त्वाऽथ तां क्रीत्वा, नीत्वाऽगान्निजमन्दिरम् ॥ १४५ ॥ एकान्तमेत्य निश्चित्य, तत्स्व-

रूपमवेत्य च । योगीव विगतस्पेन्द्रः, पित्रोरन्तिकमाययौ ॥ १४६ ॥ प्रणम्य प्रणयप्रीत्या, पित्रोः पादौ प्रमोददौ । प्रोक्तं स्वरूप-मेतस्कं, पुरः सर्वमढौकयत् ॥ १४७॥ ततः श्रीविश्रुता तेषां, प्रससार रसास्पृशाम् । कीर्त्तिर्धन्यस्य पुण्यस्य, सर्वं भाग्यवतां शुभम् ॥ १४८ ॥ तद्भ्रातॄणां भृशेच्छानां, क्रयं लाभाय चक्रुषाम् । अल्पापलाभसम्पत्ति-र्जाता दुष्कृतदुर्धियाम् ॥१४९॥ यथा(दा) तेषा-मिदं जातं, जहास जनता तदा । 'शुभाशुभेन जन्तूनां, लोकः संवाद्यते खलु' ॥ १५० ॥ पितरौ च कुटुम्बं च, बान्धवा बन्धुरा गिरा । अन्वय-व्यतिरेकाभ्यां, धन्यं तांश्चापि भाषते ॥ १५१ ॥ ततस्तेषामधन्यानां, विषाद-मदमीयुषाम् । मत्सरो हृत्सरो व्याप, पापो धन्येऽपि धीधने ॥ १५२ ॥ "दुर्जनानामियं रीतिः, प्रीतिमत्यपि मत्सरः । गुणागुणविशेषेण, सुजना दुर्जनाः पुनः ॥ १५३ ॥" अतः स्वभावतस्ते तु, मिलित्वा कलिकल्मषाः । मन्त्रयन्ति कुमन्त्रस्थं, धन्यं हन्तुं हतात्मकाः ॥ १५४ ॥ धन्यस्तु वस्तुविज्ञान-दान-वानपि सज्जने । पितृवद् भ्रातृषु स्वेषु, विशेषाकृतिमातनोत् ॥ १५५ ॥ "शीर्षकैः शालिरम्भोदा-स्तोयैश्च फलिनः फलैः । कुलीना विनयोपायै-र्नमन्ति न भयाद् भुवि ॥ १५६ ॥" इति धन्यगुणोत्कर्ष-वर्षाकालघनाघनः । न प्रीणयति कांस्कांश्च, कलावपि कलापिनः ? ॥ १५७ ॥ तद्गुणग्रहणं श्रुत्वा, विश्वत्रापि चिमृत्वरम् । श्रीराजगृहवास्तव्यः, श्रीगोभद्रः स्म मोदते ॥ १५८ ॥ शालिभद्रानुजां भद्रा-कुक्षिव(वि)न्ध्याद्रिकद्रिकाम् । सुभद्रां नन्दनीं तस्मै, धन्यायादादुदारधीः ॥ १५९ ॥ श्रीमन्महोत्सवेनाथ, सार्थवाहसुतां हि ताम् । परिणीयानणीयःश्री-धन्यो मान्योऽभवद् भुवाम् ॥ १६० ॥ "नूनं स्वसदृशे जाते, संयोगे दम्पतीपदे । पोस्फु-र्ज्यन्ते गुणा वृक्षा, जलसिक्ता इवाधिकम् ॥ १६१ ॥ वरा वधूर्भवेत् क्वापि, वरः क्वापि गुणैर्वरः । वधू-वरं द्वयं योग्यं, जायतेऽपण्यपुण्यतः ॥ १६२ ॥" बान्धवास्तु त्रयोऽप्यग्र(ग्र्या) मत्सरोच्चे(रसे)कपिच्छलाः । चिन्तयन्त्यन्यथा धन्ये, विधातुमसमञ्जसम् ॥ १६३ ॥

तत् क्षुद्रालोचनं स्नेह–मोचनं समवेत्य ताः । भ्रातृजायास्तु धन्याय, श्रीस्थैकान्ते न्यवेदयन् ॥ १६४ ॥ मा मंस्थास्त्वमिदं देव-
श्रीतरोऽमी हिता मताः । यदेते चिन्तयन्त्यन्त–स्तद् वक्तुमपि नोचितम् ॥ १६५ ॥ "प्रायो दुर्जनवृत्तीनां, न स्वकीयः परोऽपि
वा । खलत्वेन खलु क्ष्मायां, खेलयन्त्यखिलं खलाः ॥ १६६ ॥" धन्यः प्रोवाच हे भ्रातृ–जाया ! मायाविवर्जितम् ।
भ्रातृणामपराधो हि, कोऽपि नारोपितो मया ॥ १६७ ॥" अपराद्धं विनाऽन्येऽपि, ना(नो) रुष्यन्ति द्विपोऽपि च । किं
पुनर्भ्रातरश्चैको–दरत्वेन कृतादराः ? ॥ १६८ ॥ बान्धवास्तु त्रयोऽप्यस्था, मत्सरोच्छे(त्से)कपिच्छलाः । चिन्तयन्त्यन्यथा
धन्ये विधातुमसमञ्जसम् ॥ १६९ ॥ इत्येतद् वचनं श्रुत्वा, धन्ये मौनमुपेयुषि । खलचेष्टां कलेर्वृत्त–मिति ता
जगदुर्यतः ॥ १७० ॥ "अकारणक्रुधोऽसङ्ख्याः ससङ्ख्याः कारणक्रुधः । न कारणेऽपि कुप्यन्ति, पञ्चषास्ते जगत्यपि
॥ १७१ ॥" तदाकर्ण्य सकर्णोऽन्त–र्धन्यो मन्युविवर्जितः । न स्थातुमिह मे युक्तं, त्वाज्यं सङ्क्लेशकृद् यतः ॥ १७२ ॥ "यत्र
स्वोऽपि परो वाऽपि, प्रायो दूयेत चेतसि । तत्र न स्थीयते स्थाने, स्थाने तत्त्वागजागरः ॥ १७३ ॥ पराबाधां यतः सन्तो, नो कुर्वन्ति
विवेकिनः । परपीडापरित्यागः, पुण्यमेव हि गण्यते ॥ १७४ ॥" इति निश्चित्य चित्तान्त–र्नितान्तोत्साहसाहसः । निर्ययौ स्व-
गृहात् पुण्य–परीक्षामीक्षितुं क्षितौ ॥१७५॥ ग्रामाऽऽकर–पुराराम–रामणीयकसङ्कुलाम् । स पृथ्वीं परिबभ्राम, निकामस्वजनात्मकः
॥ १७६ ॥ तं भ्रमन्तमदभ्राभं, यो जनः पश्यति स्म सन् । स स्वीयं सफलं मेने, नयनद्वयमायतम् ॥ १७७ ॥ मार्गगः सोऽन्यदा
क्वापि, क्षेत्रासन्नभुवि स्थितः । कौटुम्बिकेन केनापि, दृष्टः स्पष्टतराकृतिः ॥ १७८ ॥ प्रस्तावाद् भोजनार्थं च, न्यमन्त्र्यत स
मित्रवत् । 'भाग्यभाजस्तु सर्वत्र, लभन्ते समयोचितम्' ॥ १७९ ॥ तत्तदनुरोधेन, स त्वासीनस्तदन्तिके । यावत् तावत् समा-

याता, भक्तादात्री हि तत्प्रिया ॥ १८० ॥ कौटुम्बिकेन सा प्रोचे, भोजयातिथिमादितः(दरात्) । भोजनावसरे धन्यै-र्यतो भाग्यात्
स श्रूयते ॥ १८१ ॥ उपवेश्याग्रतोऽभ्यग्रो, धन्यस्तत्प्रियया तदा । क्षीर-खण्डाज्यसाम्राज्य-सुभोज्यं भोजितस्ततः ॥ १८२ ॥
कुटुम्बिनस्तु तत्कालं, हलं खेटयतस्ततः । लग्नं हलं बलात् कण्ठे, कलस(श)स्य भुवस्तले ॥ १८३ ॥ स्वर्णपूर्णं समालोक्य,
कलशं विलसन्मुदा । लब्धं तद्भाग्यतस्तस्मै, ढौकयामास सोऽञ्जसा ॥ १८४ ॥ भो ! भाग्यवद् गृहाणेदं, त्वद्भाग्यान्निर्गतं भुवः ।
यतस्त्वयि समायाते, क्षितेराविरभूददः ॥ १८५ ॥ कुटुम्बेनेति स प्रोक्तः, संयुक्तः शकचेतसा । महामना धनायामुष्य, यच्चक्रे
तन्निरूप्यते ॥ १८६ ॥ महोदारमना धन्यः, प्रायशो निःस्पृहाशयः । तस्मै कुटुम्बिने दत्त्वा, तदग्रे चलति स्म सः ॥ १८७ ॥ क्रमात्
कौतुकसम्पूर्णा-मुर्वरामुर्वराकृतिः । क्रामन् राजगृहं प्राप, सम्यक् राजद्गृहं बृहत् ॥ १८८ ॥ यत्र सुत्रामसुत्राम-सूत्रणासूत्रसूत्रभृत् ।
राजते श्रेणिको राजा, श्रेणिकोविदवन्दितः ॥ १८९ ॥ यस्मिन्नर्हद्गृहोत्त(त्तु)ङ्ग-पताकाभिरिवाभितः । समागन्तुमनाः पान्थ-
जनस्त्वाहूयते हितात् ॥ १९० ॥ तदुपान्तगते क्वापि, जीर्णोद्याने श्रमच्छिदे । तदा शिश्राय विश्राम-कामभृद् धन्यनामकः
॥ १९१ ॥ पुराऽऽसीत् सीददस्यन्तं, शुष्कं पक्वं च यद् वनम् । जल-पुष्प-फलापेतं, चेतःसन्तापहेतुकम् ॥ १९२ ॥ तद् धन्यस्य
प्रभावेन, वसन्तेनेव वासितम् । सजलं फल-पुष्पाली-मालीभ्राजनि नन्दनम् ॥ १९३ ॥ युग्मम् ॥ यत्र धन्यजनोऽभ्योऽति-याति
सातिशयः स्वयम् । तत् स्थानं सोऽपि चाप्नोति, सर्वदा सम्पदां पदम् ॥ १९४ ॥ तदा कुसुमपालस्तु, मालिकोऽत्र समागतः ।
तद् दृष्ट्वा तादृशं दृश्यं, साश्चर्यो मुमुदे हृदि ॥ १९५ ॥ किमेतदिति चित्तान्त-श्चिन्तयन् यावदस्ति सः । तावदग्रे व्यलोकिष्ट,
पुष्टपुण्याकरं नरम् ॥ १९६ ॥ तं दृष्ट्वा धन्यमासीन-मनुदासीनमाकृतेः । परिरभ्याभिसम्भाष्य, निन्ये स्वगृहमाग्रहात् ॥ १९७ ॥

धन्यं धामसमायातं, मालिकः सकुटुम्बकः । सत्वक्रे बहुमानादि–प्रदानेन प्रमोदतः ॥ १९८ ॥ "यतः सिता मता हंसाः, शिखिनश्चित्रिता यथा । जन्म मृत्युश्च सर्वत्र, तद्वद् भोगाश्च भोगिषु ॥ १९९ ॥" एवं च विघ्नतस्तत्र, सुखाभिमुखतायु(जु)षः । धन्यस्य यदभूद् भव्यं, नव्यं श्रयं तदुच्यते ॥ २०० ॥ अथ तत्र पुरे राज्ञः, श्रेणिकस्य क्षितिक्षितः । सोमश्रीनामतः पुत्री, मित्रीकृतरमाप्सराः ॥ २०१ ॥ कनीयसी स्वसा चास्ति, शालिभद्रस्य भद्रदः । सुभद्रानामभृच्छील–समुद्रामुद्रचन्द्रिका ॥ २०२ ॥ सुता कुसुमपालस्य, तस्य पुष्पवती पुनः । अस्ति विस्तारिलावण्य–पुण्यपुष्पैकवाटिका ॥ २०३ ॥ इति तिस्रोऽपि ताः कन्याः, पुण्याः पुण्याहसम्भवाः । परस्परप्रीति–स्यूताः सख्योऽभवन् मिथः ॥ २०४ ॥ ताभिरभ्यधिकप्रीत्या, मन्यते स्म सविस्मयम् । यदाऽस्माभिर्वरस्त्वेको, वर्तव्यो वरमूर्तिमान् ॥ २०५ ॥ ततो नः क्रीडितं क्रीडा–कीटमुत्पीडमीक्षितम् । भणितं गुणितं ज्ञातं, तत् सर्वं फलवद् ततः ॥ २०६ ॥ एवं तासां च विमृशां, धुसृणाचिस्तनूत्विषाम् । याति कालः कलाकेलि–कलाकेलिकुतूहलैः ॥ २०७ ॥ पुष्पवत्यन्यदा सोम–श्रियाः सख्या विचक्षणा । समाख्यातवती वार्त्तां, धन्यस्य गुणसम्पदाम् ॥ २०८ ॥ तां श्रुत्वा राजसूः साऽऽसीद्, भावसद्भावभाविता । सानुरागाऽङ्गसंसङ्गि–दृश्यद्रोमाञ्चकञ्चुका ॥ २०९ ॥ सत्यमेतद् यतः काम–शास्त्रेष्वेवं निरीक्ष्यते । 'प्रियश्रुतेः पुरन्ध्रीणां, कामभावा भवन्त्यमी' ॥ २१० ॥ "सज्जनानां सुजनानां, स्वजनानां गुणोत्करः । सज्जनानां सुजनानां, स्वजनानां श्रुतिप्रियाः ॥ २११ ॥" सोमश्रीर्ज्ञापयामास, सख्या स्वां मातरं तराम् । साऽपि श्रीश्रेणिकक्ष्मापं, तच्चित्तार्थप्रकर्षतः ॥ २१२ ॥ प्रहृष्टः श्रेणिको राजा, तमाकार्य स्वकार्यवित् । व्यलोकिष्ट पटिष्ठश्री–सि(धि)श्रीकृतपुरं वरम् ॥ २१३ ॥ अथो मिथः समालोच्य, सर्वस्वजनमानवैः । मेलयित्वाऽग्र्यसामग्री–महोत्सवपुरस्सरम् ॥ २१४ ॥

सुलग्ने सुमुहूर्ते च, सुवेलायां बलोदये । धन्यः कन्याः स्वका धन्या, महद्धर्या परिणायितः ॥ २१५ ॥ युग्मम् ॥ "को वरं प्रवरं प्राप्य, भाग्ययोगार्पितं पिता । साध्यसद्धर्म्यवाहाय, विवाहाय विलम्बते ? ॥ २१६ ॥" चतुर्षु मङ्गलेष्वेवं, प्रवृत्तेषु प्रदक्षिणम् । उलूलूध्व-निरातेने, पौराणां श्रवणोत्सवम् ॥ २१७ ॥ स्फेरकेषु प्रवृत्तेषु, चतुर्षु चतुरीं परि । हस्तमोकविधौ बध्वा, यद्धर्मं तद्विशम्यताम् ॥ २१८ ॥ देश–प्रासाद–हस्त्यश्व–विश्वविश्वम्भराऽऽदिकम् । मणि–मुक्ताफल–स्वर्ण–पूर्णपात्रमनेकशः ॥ २१९ ॥ दिव्यवस्त्र–परीभोग–राज-चिह्नानि यानि च । सुतास्नेहाच्च पितृभि–स्तस्मै तत् सर्वमर्पितम् ॥ २२० ॥ युग्मम् ॥ पुरस्यान्तर्विशेषेण, कीर्त्तिः स्फूर्त्तिप्रसृत्वरा । देहे श्रीश्च स्त्रियो गेहे, धन्यं पुण्यादवीभजन् ॥ २२१ ॥ 'यस्य धर्मो धनं तस्य, धनात् कामः सुखं ततः ।' समकालं त्रयं दध्रे, धन्यः पुण्यात् पुराऽर्जितात् ॥ २२२ ॥ भोगास्तद्भोगशक्तिश्च, दारास्तत्प्रीतिरुत्तरा । वैभवं दानशक्तिश्च, भाग्याद् धन्ये तदा-ऽभवत् ॥ २२३ ॥ वीप्सा कान्ताऽप्सरोऽभीप्सु–गीतामृतरतिस्थितिः । दिव्यं शय्यासुखं साधो–दोग(दो)गुन्दुक इवामरः ॥ २२४ ॥ "ददते पात्रदत्ति ये, बाला बालाश्च भावतः । लभन्ते सुलभं ते हि, वैभवं प्राप्य वै भवम् ॥ २२५ ॥" ज्ञात्वेति तत्त्वतो दानं, ददानोऽर्थिगणार्थितः । सकान्तः सुखमेकान्तं, भुङ्क्ते भोगफलोदयम् ॥ २२६ ॥ युग्मम् ॥ प्रमदात् प्रमदाक्रीडे, क्रीडन् क्रीडा-सनीडमुत । तिष्ठत्युत्कृष्ट(त्कृष्ट)सौभाग्य- भाग्योऽसौ भोम(भोग)भासुरः ॥ २२७ ॥ इत्यादिसुखसंलीनः, श्रीनवद् भोगसागरे । क्षणवत् पुण्डरीकाक्षो, वासरान् समसीसरत् ॥ २२८ ॥ इति सततसुखश्रीभासुरो भासुरो वा, धृतयुवतिसुतारं राजते राजतेजाः । जयति च यतिवर्यं भावयन् जैनधर्मं, स्वहृदि शहृदयोऽयं सज्जयानन्दलक्ष्मीः ॥२२९॥ एवं तत्र पुरे नरेश्वरपुरःप्रोद्भूतभाग्योदयः, पुष्यन् मुख्यमनुष्यसौख्यमखिलं विख्यातिमाख्यान् सुखाम् । सन्मानं त्वसमानमात्मनि दधद् धन्यो नृपेभ्यो गणे, यत् संयोगमवाप ताप-

रहितस्तत् साम्प्रतं प्रोच्यते ॥२३०॥ इति धन्यमहापुण्य–नररत्नशिरोमणेः। जिनधर्मजयानन्द–प्रस्तावो द्वितीयोऽभवत् ॥२३१॥

इति श्रीधन्यचरित्रे सुकुलावतार–जन्म–यौवनावसर–विदेशप्रचार–राजगृह-
प्राप्ति—विवाहलाभ–भोगसंयोगलक्षणो द्वितीयः प्रस्तावः ॥ २ ॥

अथ तृतीयः प्रस्तावः।

अथास्य धन्यस्य यथार्थनाम्नः, क्रमात् परीणामधुरन्धरस्य। राजगृहस्थस्य गृहस्थितस्य, यज्जातमेतत् परिकीर्त्यतेऽतः ॥ १ ॥ "धर्मेण लक्ष्मीरतिनिर्मलाः कलाः, धर्मेण सौख्याप्तिरतीव सत्फला। धर्मेण शश्वत् स्वजनादियोगता, धर्मेण निःशेषसुखोपयोगता ॥ २ ॥" अथान्यदा मुदोपेत–श्वेतःश्रेयःश्रियाऽन्वितः। गवाक्षस्थो महावक्षा धन्यः पश्यन् पुरं पुरः ॥ ३ ॥ राजमार्गे क्षिपन् दृष्टिं, वृष्टिं पीयूषरोचिषाम्। अद्राक्षीत् पितरौ साक्षात्, क्षुधाक्षामौ कुभिक्षुवत् ॥ ४ ॥ युग्मम् ॥ प्रथमं प्रथयंश्चेतः, किमेतदिति संशयि। विचार्य च पुराकर्म–मर्मनिर्मापकर्मणाम् ॥ ५ ॥ सम्यग् निरीक्ष्य विज्ञायाऽ–वज्ञाय च मनोभ्रमम्। उपलक्ष्य धिया दक्षो, द्वाःस्थेनाकारयत् ततः ॥ ६ ॥ वेश्ममध्यमथो नीत्वा, ममत्वादरसुन्दरम्। समावर्ज्य समभ्यज्य, संस्नाप्य च विचक्षणम् ॥ ७ ॥ वस्त्राभरणसम्भारै–र्भूषयित्वा विशेषतः। पुरस्कृत्य च सत्कृत्य, स तत्पादौ मुदाऽनमत् ॥ ८ ॥ युग्मम् ॥ निवेश्याऽऽसनमानम्य, तौ पुनर्विनयान्वयात्। अपृच्छ स्वच्छधीरर्थ–बन्धुशुद्धिमधि स्वयम् ॥ ९ ॥ हे मातृ–पितरौ ! भूतं, किं स्वतं क गतं धनम् ?। कथमेतादृशी जाताऽ–प्यवस्था दुःस्थितत्वतः ॥ १० ॥ ततस्तौ धन्यसम्पृष्टौ, संस्पृष्टौ हर्षवर्षणैः।

तं च प्रत्यूचतुर्वाचा, यथा वृत्तमथात्मनः ॥ ११ ॥ यत् त्वया त्वर्जितं वित्तं, स्वभाग्याभोगभागतः । त्वया सहैव तद् यातं, सर्वमुर्व्यपि सम्प्रति ॥ १२ ॥ "यथा च(चा)न्द्रं महस्तेन, दिनेनेन सदा दिनम् । तथैव धनिना सार्धं, धनमेतीति निश्चितम् ॥ १३ ॥" सत्येवंविधसम्बन्धे, निबन्धे तु स्वकर्मणाम् । त्वमस्माभिः श्रुतः श्रुत्या, राजा राज्यश्रिया श्रितः ॥ १४ ॥ आगच्छामो वयं वत्स !, वत्सलं त्वां पुनः प्रति । यदा पैवर्जनैः स्वीयैः, स्वजनो ह्यनुगम्यते ॥ १५ ॥ पुनर्धन्याभिधोऽभाणीत्, प्रमाणीकृतसद्गुणः । मातर्मे भ्रातरस्ते क ?, सन्ति ये दुर्लभा भुवि ॥ १६ ॥ "देशे देशे कलत्राणि, मित्राणि च पदे पदे । देशं तं नैव पश्यामि, यत्र भ्राता सहोदरः ॥ १७ ॥" इति धन्यपरिपृष्टेऽशिष्टेऽम्बाऽवदद् वत । ते सन्ति त्रायमाणस्थाः, पुराद् बहिरिहाहिताः ॥ १८ ॥ धन्यस्तु तान् समानाय्य, न्याय्यवित् सपरिग्रहान् । सन्मान्य मान्यवद् धान्य–धनाद्यं च ददौ तदा ॥ १९ ॥ विभज्य च क्रमाद् ग्राम–सीमासारं पृथक् पृथक् । स्थापयामास सावासं, सुजनास्त्वादृशा यतः ॥ २० ॥ "ये सन्तः सन्ति सन्तुष्टा, विशिष्टा–भीष्टचेष्टिताः । दुर्जनेष्वपि ते कुर्युः, सुजनेष्विव सुन्दरम् ॥ २१ ॥" "उपकारिषु ये तूप–कारिणस्ते जना घनाः । अपकारिषु ये चोप–कारिणस्ते सुसज्जनाः ॥ २२ ॥" एवं स्वजनसौजन्य–संयोगे योगमागते । वेश्मभारं सदाचारं, पित्रोस्तत्र न्यवीविशत् ॥२३॥ आत्मनाऽऽस्ते यथाभिच्छा–ऽभीप्सुको वाञ्छितोत्सवम् । विलसन् ललना लीला–कमलाः कमलायते ॥२४॥ यथा वृन्दावने स्त्रीभि–र्गोविन्दो विन्दते सुखम् । तथाऽऽवासे स पत्नीभि–र्भुङ्क्ते वैषयिकं सुखम् ॥२५॥ यद्वद् विन्ध्यावनीमध्ये, करिणीभिः करीश्वरः । कान्ताभिस्ताभिरश्रान्तं, क्रीडत्यन्तःपुरे तथा ॥ २६ ॥ एवं सति गते काले, कियत्यपि सुखाशिषाः(खाःशि) । पुनर्धन्यस्य भ्रातॄणां, दुष्कर्मोदयमासदत् ॥ २७ ॥ कश्चिच्छामत्सरोत्सेकं, धन्ये दधति तेऽधिकम् । तच्छलाघालापनं श्रुत्वा,

परेर्ष्यन्ते प्रतिक्षणम् ॥ २८ ॥ "येऽधमाः प्रायशः पूर्वा-धर्मकर्मकुवर्मिताः । स्वस्मै परस्मै धन्याय, ते द्विषन्ति द्विषो यथा ॥ २९ ॥" ते त्रयः कुधिया सत्रा, पर्यालोच्य स्वगुरोचितम् । पृथग्वासाय सापायाः, प्रोचुर्नीचाः पितुः पुरः ॥ ३० ॥ स्थास्याम-स्तात ! नैकत्र, तद् विभज्य प्रयच्छ नः । यच्छारं येन धन्येन, पृथग्भूता वयं परम् ॥ ३१ ॥ पृथग्भूता वयं श्रेष्ठा ज्येष्ठानुक्रम-भागिनः । वत्स्यामो निजभाग्येन, किं धन्येन सताऽपि हि ? ॥ ३२ ॥ सकर्णः स समाकर्ण्य, श्रेष्ठी ज्येष्ठात्मजोदितम् । व्यचि-न्तयदिति स्वान्ते, यदेते भाग्यभङ्गुराः ॥ ३३ ॥ लभन्ते स्थितिं निर्भाग्याः, खादन्तः खादितुं न यत् । स्वदुर्बुध्या विराध्यैनं, धन्यं धन्यतमाग्रिमम् ॥ ३४ ॥ "भाग्यायोग्या नराः प्रायः, प्राग्दुष्कर्मप्रणोदिताः । तद्चेष्टन्ते विनष्टेष्टं, न तिष्ठति यतोऽखिलात् ॥३५॥" ध्यात्वेति हेतिवच्चित्त-पीडकं व्रीडकं सताम् । प्राह तान् सहितं शिक्षा-ऽन्वक्षं क्षणमवेक्ष्य यत् ॥ ३६ ॥ अये पुत्राधमाधन्या !, जन्यजन्यमनोभ्रमाः । धन्यार्जितं हतात्मानः, सन्तु जेमन्त इत्वराः ॥ ३७ ॥ युष्माकं कथ्यते कथ्यं, विमथाऽथ्यमुत्पथाः । पूर्ववच्चाधुना येषां, दुर्बुद्धिः सविधीभवेत् ॥ ३८ ॥ तत् तत् तातवचोऽवाच्यं, मत्वाऽऽत्मनि नियोजितम् । तेऽप्यूचिरे विरेकोक्तं, वाक्यं पाक्यमिवांहसः ॥ ३९ ॥ धन्योऽयं लघुरप्याशु, युष्मन्मस्तकचाटितः । साररत्नान्यलं लात्वा, पलायिष्ट स दुष्टवत् ॥ ४० ॥ ततो धनप्रधानत्वा-दत्राप्येष विशेषतः । राजादेरभवद् माता, जामाता जातसातभृत् ॥ ४१ ॥ पितृपादाः प्रकुर्वन्तु, राज्यं धन्येन संयुजः । वयं प्रभाते भोक्ष्यामः, पृथग्भूय ततस्ततः ॥ ४२ ॥ इति श्रुत्वा श्रवोऽश्रव्यं, भ्रातॄणां वचनाञ्जनम् । जागर्त्ति मे पुन-र्भाग्यं, ब्रुवते यदमी खदः ॥ ४३ ॥ चेन्मे पूर्वभवोपात्तं, पुण्यमस्ति सुविस्तृतम् । पुनस्तस्य परीक्षार्थं, यामि देशान्तरं वरम् ॥ ४४ ॥ विमृश्येति हृदा धन्यो, धन्यम्मन्यो हृदा मुदा । चचालोत्तालवाचाला-नुकूलशकुनानिलः ॥ ४५ ॥ "गोष्ठ्यैः किमु

तैर्गेहे–नर्दिभिः कूपदर्दुरैः ? । निःशेषां ये न वीक्षन्ते, नानाऽऽश्चर्यधरां धराम् ॥ ४६ ॥" इति भ्राम्यन् क्षमां पश्यन्, कौतुकानि विलोकयन् । आप पापविनिर्मुक्तं, वत्सदेशं सुसुन्दरम् ॥ ४७ ॥ कौशाम्बी नगरी यत्र, कौशाम्बीभूतभूतला । स्फारप्राकारविस्तार–कारस्करपुरस्कृता ॥ ४८ ॥ यस्यां लोकः कृपालोकः, शोकशङ्काविवर्जितः । दानादिपुण्यनैपुण्य–पण्यपुण्यापणक्षणः ॥ ४९ ॥ शतानीको नृपस्तत्र, शतानीकसमाकुलः । राजते राजसत्कीर्त्तिः, कान्ता यस्य मृगावती ॥ ५० ॥ स राज्यं कुरुते राजा, जायमानमना गुणैः । लोकम्पृणस्फुरद्व्रातो, प्रात्यः प्रातरपि प्रभुः ॥ ५१ ॥ एकदा दापितार्थेन, भाण्डागारानुयोगिना । अनुयुक्तेन विज्ञप्तः, कोशे रत्नं विभोऽस्त्यदः ॥ ५२ ॥ तत्परीक्षा–निरीक्षाऽऽप्ताः, पृष्टाः प्रष्टास्तदीक्षकाः । न सम्यक् कोऽपि जानाति, तत्परीक्षां परीक्ष्यपि ॥ ५३ ॥ तदा सन्देहमुच्छेत्तुं, परिच्छेत्तुं च तद्गुणम् । डिण्डिमो वादयाभासे, राज्ञा विज्ञातुमिच्छता ॥ ५४ ॥ एकमस्ति महामूल्यं, मत्कोशे रत्नमुत्तमम् । यस्तत् सम्यक् परीक्षेत, ददे तस्मै मुदेप्सितम् ॥ ५५ ॥ तथाप्येतन्मनस्तुष्ट्यै, श्रूयतां श्रवणप्रियम् । येन प्रत्ययमायाति, मानसं मानसंविदा ॥ ५६ ॥ दन्तिनां शतमुन्मत्त–मश्वानां शतपञ्चकम् । सौभाग्यमञ्जरीं पुत्रीं, ग्रामपञ्चशतान्विताम् ॥ ५७ ॥ एतच्छ्रुत्वाऽग्रतः स्थित्वा, श्रीपथे श्रीपथे स्थितः । स धन्यः स्पृष्टवान् स्पष्टं, पटहं पटुहस्ततः ॥ ५८ ॥ तत्समं स ययौ राज–वेश्म विस्मयसस्मयम् । गुणाः प्रायेण मान्याः स्युः, किं पुनः पुण्यधन्यसाः ? ॥ ५९ ॥ बहुमानं ददौ राजा, सभाजाश्रितसंश्रितः । योग्यमागन्तुकस्यापि, गौरवं गुणिनां किमु ? ॥ ६० ॥ तदाकृतिप्रकृत्याऽपि नृपः प्रमुमुदेवसाम् । स्थानेऽस्य गुणिता यस्मा–दाकृतौ सा कृतस्थितिः ॥ ६१ ॥ पञ्चाङ्गस्पृष्टभूपृष्ठः, स ननाम क्षमापतिम् ।

कुशलालापसंलापात् सोऽपि राज्ञाऽभ्यभाष्यत ॥ ६२ ॥ रत्नयत्नविदा तेन, परीक्षोदीक्षिता तथा । यथा राज्ञः सभायाश्च, चमत्कारोऽभवच्चिरम् ॥ ६३ ॥ सर्वे सभासदः सद्यः, प्रमोदामोदमेदुराः । राज्ञे विज्ञपयामासु–स्तेन रत्नवतीं श्रुतम् ॥ ६४ ॥ "सन्ति सन्तः कियन्तस्ते, ये गुणैः प्रगुणैर्निजैः । गुणिचित्तप्रशस्त्यश्म–न्यात्मानं तूत्किरन्त्यरम् ॥ ६५ ॥" रत्नजातिश(शि)रो-रत्न–परीक्षाक्षेपवीक्षणात् । रञ्जितः सकलो लोक–स्तं व्यलोकत लोकतः ॥ ६६ ॥ शतानीकोऽथ सद्वीकः, स्ववचश्चयनिश्चयी । तस्मै प्रोक्तघनस्मेरां, ददौ पुत्रीं प्रसादतः ॥ ६७ ॥ "तैर्धन्यैर्भूषिता भूमि–र्ये निजोक्तसुयुक्तयः । मुक्ता इव गुणैर्युक्ता, निर्वहन्ते प्रयत्नतः ॥६८॥" "ते जनाः सज्जनाः सन्ति, कियन्तो न घनाघनाः । घनाघना इव घन–प्रतिपन्नप्रतिक्रियाः ॥ ६९ ॥" अथ धन्योऽपि पुण्यात्मा, सात्म्यतः सकलाः कलाः । केलयन् मोदयाश्चक्रे, सचक्रं पूर्णचन्द्रवत् ॥ ७० ॥ धन्यस्तु शस्तलग्ना–श्चे लग्नेऽस्तिलग्नके । हस्तमोचनदानाभ्या–मुपयेमे नृपात्मजाम् ॥ ७१ ॥ तत्रोत्सवा नवनवा, दान–मानमुखाः सुखम् । लोकाः सम्प्रीणिता दध्या, विशेषाच्च वनीपकाः ॥ ७२ ॥ यतः—"जल्प प्रियं प्रदर्शय, हृदादरं सुहृदि निपत पादेषु । दानं विना न किञ्चित्, सुशोभते दन्तदर्शनिका ॥ ७३ ॥" "सर्वः कोऽपि जनः प्रायो, महत्त्वाय महत्त्वरः । महत्त्वं प्राप्यते तर्हि, यर्हि दानं प्रदीयते ॥ ७४ ॥" राजपुत्र्या समं धन्यः, पौनःपुन्येन पुण्यतः । सुखं वैषयिकं भुङ्क्ते, लक्ष्म्या लक्ष्मीपतिर्यथा ॥ ७५ ॥ योग–क्षेमक्षमाक्षेपः, सदौदार्यमहोर्जितः । धन्यः साधुरिति ख्यातिं, प्राप क्ष्मापसमोऽपि सः ॥ ७६ ॥ नव्यद्रव्यार्जनैश्वर्य–कृते सत्कृत्य कृत्यवित् । वाणिज्यकारकास्तेन, प्रहिताः प्रहितायतेः ॥ ७७ ॥ सुवाणिज्यानि ते कृत्वा, भृत्वा द्रव्यमुपार्जितम् । आगच्छन्ति च गच्छन्ति, वणिजां सत्क्रमोऽस्त्ययम् ॥ ७८ ॥ एवं याति पुरा ख्याति–भाति काले निराकुले । धन्यस्य तस्य

सौभाग्य–भाग्यभोग्यं किमभूत् ॥ ७९ ॥ अन्यस्मिन् दिवसे कस्मिन्, स्वकीर्त्यर्थं यथार्थकृत्। लोकाचारकृते चार्वा–रेभे खानयितुं सरः ॥ ८० ॥ यतः–"शास्त्रं जलाश्रयो वृक्षा, देवतायतनानि च। मृतानामपि जन्तूनां, जीवितं मनुरब्रवीत् ॥ ८१ ॥" वापीरपापी सरसीरसीमाः, कूपानकूपारगभीरचेताः। प्रपा[ः] कृपावाननतनिष्ट दैव–सौधान्यसौ धार्मिकचक्रवर्ती ॥ ८२ ॥ अतस्तन्नगराभ्यर्णे–चातुर्वर्ण्योपसर्पणम्। तेन खानयितुं नीत्या, प्रारेभे रभसा सरः ॥ ८३ ॥ यतश्च–" सरो वापी प्रपा कूप–कुण्ड-देवकुलादिकम्। कीर्त्तनं कार्यते तीर्थे, कीर्त्तिस्फूर्त्तिमभीप्सुभिः ॥ ८४ ॥" इतश्च श्रेष्ठिनो गेहाद्, धन्ये धन्ये विनिर्गते। सञ्जते स्नेहोर्जोनि–दीपे पोर्देवितान्ते ॥ ८५ ॥ दारिद्र्ये सान्द्रमायातं, ध्वान्तवद् ध्वंसिताध्वकम्। पुण्योद्योते गते तस्मिन्, विस्मयः कः खलूच्यते ? ॥ ८६ ॥ युग्मम् ॥ यतः—" तैलं नास्ति घृतं नास्ति, नास्ति मुद्ग–युगन्धरी। वल्लार्थे लवणं नास्ति, नास्ति तद् यत् तु भुज्यते ॥ ८७ ॥" यथा च—" न तस्यास्ति तैलं घृतं नास्ति किञ्चि–न्न मुद्गा युगन्धर्युपेताश्च सन्ति। न वल्लादिशाकेऽपि लावण्यमस्ति, न तच्चास्ति यद् भुज्यते भोज्यकार्ये ॥ ८८ ॥" इति सर्वप्रकारेण, धनसारस्य मन्दिरे। धनसारत्रुटिर्जाता, विना धन्यं समुत्तमम् ॥ ८९ ॥ ततः श्रेष्ठी मतिश्रेष्ठी–कृतचित्तो व्यचिन्तयत्। यदस्माकमभूद् भूति–स्तद् धन्यस्यैव पुण्यतः ॥ ९० ॥ गौरवं च गतं स्वेषु, स्वापतेयं विनाऽधुना। 'धनाधीना यतः सर्वा, गृहस्थानां गृहस्थितिः ॥ ९१ ॥' धन्याधीनं धनं तत्र, तेन यातं समं समम्। दीपे वेश्मान्तरस्मेरे, भासते भवनं किमु ? ॥ ९२ ॥ धन्यप्रभावतः ख्यातः, पुरे पूज्योऽभवं पुरा। किमु शक्रध्वज-व्याजात्, स्तम्भः पूज्यैर्न पूज्यते ? ॥ ९३ ॥ " यस्मिन् कुले यः पुरुषः प्रधानः, स यत्नतः स्यात् परिरक्षणीयः। तस्मिन् प्रयाते सकलं प्रयातं, न नाभिभिन्नास्त्वरकास्त्वरन्ते ॥ ९४ ॥" " ते धन्या ये निजं भाग्य–भाजं राजसमं समम्। चकोरा इव सेवन्ते, सदानन्दा-

मृतप्लुताः ॥ ९५ ॥" अहं त्वनिष्टपापिष्ठ-वृद्धपुत्रत्रयोऽत्रपः । दरिद्रो रत्नवद् यत्नाद्, यत् तं न सममालयम् ॥ ९६ ॥ एतत्पुर-स्थितो दुःस्थः, स्थित्यपेतमना मनाक् । लघुवाणिज्यकं कर्म, कथं कुर्वे धनं विना ? ॥ ९७ ॥ इति स्फुटं कुटुम्बेन, विमृश्या-मृश्य चात्मना । दूरदेशान्तरं यातु-मुद्यतः सद्य एव सः ॥ ९८ ॥ यत्र कोऽपि न जानाति, परमार्थमनर्थकम् । परकर्मापि निर्मा-थो-दरं तत्र तु पूर्यते ॥९९॥ यतः-"सद्बुद्धेरपि बुद्धिस्तु, निर्धनस्य विनश्यति । घृत-तैलान्न-पानाग्नि-वस्त्रेन्धन-धनायया ॥१००॥" नदीभिर्यदि नोदीर्ण-पयोभिः परिपूर्यते । तदोदरेषु तूदन्वान्, दीयमानः प्रहीयते ॥ १०१ ॥ इति चिन्ताचिताचान्त-स्वान्तस्ता-न्तो निशान्ततः । यच्चकाराऽऽतुरः श्रेष्ठी, तत्स्वरूपं प्ररूप्यते ॥ १०२ ॥ धन्यजायाद्वयं त्वाद्यं, प्रेष्य पितृगृहं बृहत् । श्वशुरश्च पुरस्कृत्य, सुभद्रामित्यभाषत ॥ १०३ ॥ भद्रे सुभद्रे ! ते भद्रं, भूयाद् भद्रङ्करं चिरम् । प्रिया हि त्वं पितुर्वेश्म, तिष्ठ तत्र स्थिता सुखम् ॥ १०४ ॥ कुलस्त्रीभिर्द्वयं श्रेयं, श्रेयोऽर्थं सम्पदापदोः । पत्युर्वेश्म पितुर्वेश्म, नात्र काऽपि त्रपा ननु ॥ १०५ ॥ इति श्रुत्वा श्रवोऽपेय-मिव तस्य वचश्चयम् । सुभद्रा साऽस्तभद्रेव, ब्रूते स्म विगतस्मयम् ॥ १०६ ॥ हे तात ! भवताऽऽख्यातं भवताऽप्याप्तचेतसा । अश्रोतव्यगतव्यद्वं, कुलस्त्रीणां मनागपि ॥ १०७ ॥ त्वया नु ताततुल्येन, मद्धितं कर्तुमिच्छता । तुच्छतावत्सले प्रोचे-ऽनुचितं न्यायसंसदः ॥ १०८ ॥ तथाप्यहमहङ्कार-विकारचिरवर्जितम् । वदामि दामवत् कामं, तत् त्वं कर्णावतंसय ॥ १०९ ॥ सुखेऽति-सम्मुखे सम्पत्-सम्पत्तिसमये श्रये । स्त्रीभिः पितृगृहं श्रेयं, श्रेयसे यशसेऽञ्जसा ॥ ११० ॥ श्वशुरस्य सुरस्येव, सेव्य(व्य)गेहमगर्हितम् । दुःखे दौःस्थ्येऽपि संसेव्यं, श्वाशुरं रंहसाहसम् ॥ १११ ॥ "कुस्त्री पित्रालयं याति, दुःखे त्यक्त्वा प्रियालयम् । प्रियालयं गताः सत्य-स्तं त्यजन्ति न सुस्त्रियः ॥ ११२ ॥" श्रेष्ठी तद्वचनं पीत्वा, पीयूषमिव सौख्यदम् । सौमनस्यं मनस्याध्यात, सुधाशन इवा-

शनैः ॥ ११३ ॥ यथा—सुज्ञानवा यदा जानन्, मिलन्म(लेश्म)लचेतनः । तदा तयोर्महानन्दः, सम्पद्येत चिदात्मतः ॥ ११४ ॥ श्रेष्ठी श्रेष्ठां चर्यां त्यक्त्वा, सत्त्वाढ्यगुणसार्थैः । सुतान्शिक्षाविशारद् वीक्ष्य, विदेशायोद्यमं दधौ ॥ ११५ ॥ हर्षश्रेष्ठस्ततः श्रेष्ठी, प्रेष्टीकृतवधूवचाः । कलत्र—पुत्रनप्त्रासः, क्षिसं(प्रं) देशान्तरं प्रति ॥ ११६ ॥ पियासुर्वासवेश्मादौ, मुद्रां दत्त्वा ममत्वतः । द्वारं पिधाय सन्ध्यायां, निर्ययौ नगरान्निशि ॥ ११७ ॥ युग्मम् ॥ यतः—" शकटं वाटिका गावः, कृषिस्स्वलने धनम् । समुद्रः पर्वतो राजा, नव दौर्गत्यशत्रवः ॥ ११८ ॥ " भ्राम्यन् ग्रामान्तरं ग्रामा—दाक्रमन् क्रमशः क्षमाम् । कर्म कुर्वन् परागारे, वृत्तिद्वारेण वर्त्तयन् ॥ ११९ ॥ क्वापि द्वित्राणि वस्त्राणि, क्वापि त्रिचतुराण्यपि । चतुःपञ्चानि च क्वापि, पञ्चषाणि तथा क्व च ॥ १२० ॥ एवं विश्रंश्रजन् श्रेष्ठी, श्रमविश्रामपूर्वकम् । सकुटुम्बः स्फुटं प्राप, कौशाम्बीनगराम्बिकाम् ॥ १२१ ॥ त्रिभिर्विशेषकम् ॥ तां दृष्ट्वा परितः स्पृष्ट्वा, [स्पृष्ट्वा] सञ्जीवनावनिम् । विष्टासुः कश्चिदप्राक्षीत्, साक्षीकृत्य कुटुम्बकम् ॥ १२२ ॥ भद्र ! ब्रूहि हितं सत्यं, मत्वा तत्त्वसतत्त्वतः । कथं निर्वहते ह्यत्र, निर्धनस्तद्धनो जनः ? ॥ १२३ ॥ यतः—" किं पुरा पूर्वजावासै—र्निरशनैर्विनाऽपि किम् ? । प्रशस्यते प्रशंसार्हैः, स देशो यत्र जीव्यते ॥ १२४ ॥ " श्रेष्ठिपृष्टमिदं श्रुत्वा, पौरोऽवादीद्वरस्त्विति । शृणु लोकाग्रणस्यास्य, पुरस्याऽऽजीविकां नृणाम् ॥ १२५ ॥ यो धनाढ्यो जनः प्रौढ—वाणिज्येन स लाभभुक् । ' वाणिज्यं वणिजां यस्मा—ल्लक्ष्मीलम्भनसाक्षिकम् ॥ १२६ ॥ ' " व्यवहारस्य संशुद्धि—र्वणिजां दुर्लभा प्रभा । यथाऽऽहारस्य संशुद्धिः, साधूनां शुद्धधीश्रुता ॥ १२७ ॥ " निर्द्रव्याणां विनाद्रव्यं, वाणिज्यं तु कथं पृथु ? । वाणिज्याय धनं वेषा—मपि प्रायेण युज्यते ॥ १२८ ॥ धनादेव प्रधानत्वं, पूज्यत्वं प्राप्नुयाज्जनः । धनहीनः कुलीनोऽपि, न किञ्चिन्मान्यतेऽन्यवत् ॥ १२९ ॥ उक्तं च—" नयेन नेता विनयेन शिष्यः, शीलेन लिङ्गी प्रशमेन

साधुः । जीवेन कायः सुकृतेन देही, वित्तेन गेही रहितो न किञ्चित् ॥ १३० ॥" "वित्तेन लभते लोकः, स्वजनेष्वपि गौरवम् ।
निर्धनो मानवः क्वापि, मान्यते न मनागपि ॥ १३१ ॥" तथाप्यत्र पुरे यो यत्-कर्मकर्मीणतापणः । सगुणां तनुते वृत्तिं, विशेष-
स्त्वेष पोषदः ॥ १३२ ॥ अन्योऽस्ति धनिविख्यातः, साधुराजापराख्यया । यत्नेन तेन वित्तेन, स्वशातये खान्यते सरः ॥१३३॥
नराः कर्मकरास्तत्र, युज्यन्ते कर्मकर्मठाः । लभन्ते कृतकर्माणो, भृतिमाजीवनोचिताम् ॥ १३४ ॥ सर्वारम्भेण तत्रापि, मृत्तिका-
कर्षणक्षणे । भूयांसः सनरा नार्यः, प्रयुज्यन्तेतरां पुरा ॥ १३५ ॥ सरःखननमु(मृ)द्वाह-कर्मान्ते दीयते त्वदः । दीनारौ द्वौ नृणां
स्त्रीणा-मेकस्त्वेकेन साधुना ॥ १३६ ॥ भोजनं हि प्रवाहेन, कटाक्षं च यथास्पृहम् । अनया निपर्णं वृत्त्या, वर्तते निर्धनो जनः
॥ १३७ ॥ युग्मम् ॥ सकुटुम्बः स्फुरं धुन्वा, श्रित्वा त्वाजीविकां तकाम् । तच्चिकीर्षुरिभ्यश्रेष्ठी, कर्मणामीदृशी दशा ॥ १३८ ॥
तद्गिरा स सरःखात-कर्मणा शर्म मानयन् । गतः श्रेष्ठी कुटुम्बेष्टः, श्रेष्ठः किं कुरुतेऽर्तितः ? ॥ १३९ ॥ खातकर्मकरैः सार्धं, स्प-
र्धमानः कुकर्मभिः । सरः खनन् वहन् मृत्स्नां, कृत्स्नमस्ति कुटुम्बयुक् ॥ १४० ॥ यतः—"यदा यस्य पुरोपात्तं, कर्मोदेति
दुरासदम् । स सीदति पदापेतो, विषादः कोऽत्र चित्रदः ? ॥ १४१ ॥" कर्मणा रामचन्द्रोऽपि, सीता-लक्ष्मणसंयुतः । भ्रामितः
भ्रामितः काम-मटन् पञ्चवटीवने ॥१४२॥ हरिश्चन्द्रः सुतारा च, रोहिताश्वस्तदात्मजः । क्वरं(रत) कारितं कर्म, परवेश्मसु कर्मणा
॥ १४३ ॥ पाण्डवाः पञ्च विख्याता, द्रौपद्याऽनुपदादृताः । विदेशे विविशुः क्लेश-महो ! कर्म महोर्जितम् ॥ १४४ ॥ राजाऽपि
रङ्कवत् क्वापि, स्खलति प्रतिनीभृतम् । कर्मणामग्रतः कोऽपि, न बली सबलः खलु ॥ १४५ ॥ इत्यात्मकर्मनिर्माणं, न शर्मणे वृणन्
हृदा । श्रेष्ठी श्रेष्ठकुटुम्बोऽपि, दिनानि नयति स्थितः ॥ १४६ ॥ कियत्स्वपि दिनेष्वेवं, गतेषु कृतकर्मतः । यदश्रद्भुतं भूयः,

श्रूयतां तत्कथाऽप्रियम् ॥ १४७ ॥ अन्येद्युरुद्यतः सद्यः, सरोवरदिदृक्षया । ताक्ष्यारूढः प्रभाप्रौढ-च्छत्र-चामरचञ्चुरः ॥ १४८ ॥ पुरःस्फुरत्सदायुध-श्रेणिः श्रेणिगणावृतः । शुभलोककृतालोकः, कोटिकाभिरलङ्कृतः ॥ १४९ ॥ हारार्धहार-केयूर-कुण्डलाखण्डलद्युतिः । मुकुटप्रकटश्रीक-दिव्यवस्त्रसमावृतः ॥ १५० ॥ धन्य साधो ! जय जये-त्यादिवादिभिरादितः । गीयमानो गुणग्राम-रामणीयककर्मभिः ॥ १५१ ॥ कल्पद्रुम इवानल्प-श्चिन्तामणिरिवोचितः । कामधेनुरिवानूत-स्तूयमानः पुनः पुनः ॥ १५२ ॥ बन्दिशब्दकृतालोकं, लोकं पश्यन्नितस्ततः । साधुराजः साधुराजः, समायासीत् सरस्तटे ॥ १५३ ॥ षड्भिः कुलकम् ॥ ततः कर्मकराः सर्वे, कर्म त्यक्त्वा स्वकीयकम् । तं तत्रायातमालोक्य, लोचनासेचनामृतम् ॥ १५४ ॥ महाभक्त्या स्वकव्यक्त्या, जीव जीवेति जल्पकाः । तेऽष्टाङ्गस्पृष्टभूपृष्ठं, नमन्ति स्म समन्ततः ॥ १५५ ॥ साधुराजः स निर्व्याज-सुधाशिशुदृशितः । लोकानालोकयामास, सोल्लासविनयानतान् ॥ १५६ ॥ पुनरालोकयन् तांस्तान्, प्रीतिस्फीतिस्पृशा दृशा । स कुटुम्बं निजम्लान-मद्राक्षीद्दुःखशोषितः ॥ १५७ ॥ दध्यौ स्वहृदये खेदं, दधन् निर्वेदमेदुरम् । दैवं हि वज्रवद् वेद्मि, दुर्दशा-दुःखदायकम् ॥ १५८ ॥ *माता ममैषै प्रख्याता, पिता दुर्जनकम्पिता । सोदराः* सुन्दराङ्गास्ते, भ्रातृजाया मता मया ॥ १५९ ॥ वल्लभा दुर्लभाकाराः, शीललीलाकलाकुलाः । सुविनीतगुणोपेत-चेतःस्थितिरतिप्रदाः ॥ १६० ॥ युग्मम् ॥ गोभद्रो भद्रगोभद्रो, जनको धनकोटिभृः । भद्रा च जननी यस्या, जननीतिपुरस्कृतिः ॥ १६१ ॥ शालिभद्रोऽग्रजश्चाभूद्, भोगाभोगसुरप्रभः । एवमप्यसवर्णाऽपि, सुभद्रा मृत्तिकां वहेत् ! ॥ १६२ ॥ युग्मम् ॥ या सा गुणगणाग्रण्या, गण्यसौभाग्यशिरोमणिः । प्रसह्य कर्मणाऽवज्ञा, वाह्यते मृत्तिकामियम् ! ॥ १६३ ॥ इत्याद्यन्तर्विचिन्त्याऽऽशु, तानाह स महा-

मनाः । समवोचत् समाकार्य, कुतो यूयमिति स्वयम् ॥ १६४ ॥ स्थानायानसमाख्यान—कृते सुकृतिना कृते । प्रश्ने तेऽथाऽऽत्म-गोपाय, किमप्याख्यन् यथा तथा ॥ १६५ ॥ यतः—" यदा न समयः स्वीयः, समुदेति मुदेनवत् । पद्माकरमिव स्वान्तं, तावन्नोद्घाटयेत् पटुः ॥ १६६ ॥ " यतः—" स कोऽपि सुजनो नास्ति, यस्याग्रे स्वाशयः स्फुटम् । प्रायशः कथ्यतेऽकथ्यो, निःश्वसन्नुच्छ्वसन्नपि ॥ १६७ ॥ " ततो धन्यपरीपृष्टे, स्पष्टे पुष्टेऽपि शिष्टितः । विमृश्याऽऽमृश्य चावश्यं, यत् किञ्चिन्नोत्तरं ददुः ॥ १६८ ॥ धन्यसाधुस्ततः साधु—शुद्ध्याकर्ण्य सकर्णवत् । मामेते चेतसा नोप—लक्षयन्ति सपक्षकाः ॥ १६९ ॥ एतके दुःखिता दुःस्था—वस्थाप्रस्थापितास्थया । स्वजनास्तेऽप्यजानाना, इव जानन्ति नैव माम् ॥ १७० ॥ यतः—" किं करोति नरोऽत्य(त्यु)-ग्र—दुःखदौर्गत्यसंगतः । ज्ञानं ध्यानं गुणाधानं, हीनं दारिद्र्यमुद्रया ॥ १७१ ॥ " तथापि तु मयाऽऽत्मन्यं, पितुर्वात्सल्यतुल्यकम् । शनैः शनैः परीक्ष्यैतां—श्चेतयिष्ये ह्यशेषतः ॥ १७२ ॥ भोजने स्वजने वा(चा)त्र, घृतं स्नेहं नियुज्य सः । सर्वकर्मकरैः सार्कं, निरातङ्कं गृहं ययौ ॥ १७३ ॥ ततः कर्मकरास्तत्र, सर्वे सम्भूय सर्वतः । परस्परं प्रजल्पन्त्य—नल्पजल्पविकल्पतः ॥ १७४ ॥ सर्वेषामात्मनामत्र, यदभूदाज्यभोज्यकम् । तदेतस्य कुटुम्बस्य, प्रभावः प्रभवत्ययम् ॥ १७५ ॥ युग्मम् ॥ पुनरन्येद्युरागत्य, धन्यः श्रेष्ठिनमूचिवान् । भवतामस्ति शस्ततरं, भोजने स्वजनैः समम् ? ॥ १७६ ॥ श्रेष्ठी तु लज्जया सज्जः, किञ्चिन्नाख्यत् तदग्रतः । 'प्रायः परं प्रार्थयितुं, सज्जिह्वा न प्रगल्भते ॥ १७७ ॥ ' धन्यः साधुस्ततोऽवादी—दनादीनवसद्वचाः । तत्कारू श्रवे कुटुम्बस्य, भाविन्यस्य निशान्धता ॥ १७८ ॥ इति संश्राव्य गेहेऽगा—दुपकारचिकीरसौ । प्रगेऽह्नाय द्वितीयेऽह्नि, तत्रागत्य स तानवक् ॥ १७९ ॥ विशेषाच्छ्रेष्ठिनं श्रेष्ठ—गिरा प्रीतिसुधाकिरा । जगाद सदयस्वान्त—स्तं प्रति ज्ञातुमिच्छुधीः ॥ १८० ॥ भवतां·

श्रीमतां मन्ये, कुटुम्बं मुकुटोपमम् । वर्णिका वर्ण्यते यस्मात्, काञ्चनेऽपि चिरन्तने ॥ १८१ ॥ कुतश्चेयमवस्था वो, दुःस्थताऽत्रस्थितात्मनाम् । तदेतत् कथ्यतां तथ्यं, शुश्रूषा मे प्रकर्षतः ॥ १८२ ॥ साधुनेति तदा पृष्टे, तस्थुस्ते मौनवर्त्तिनः । धन्योऽपि पुनराह स, तान् प्रति प्रीतिवागथ ॥ १८३ ॥ मद्गृहे बहुलं तक्र-मस्ति शस्ततमं ततः । युष्माभिरन्वहं ग्राह्यं, न ह्यत्र कापि वत्रपा ॥ १८४ ॥ एकैको घटको ग्राह्य-स्तक्रपूर्णो महत्तमः । कुटुम्बार्थे वधूः प्रेष्या, यतो वः स्यात् सुखावहम् ॥ १८५ ॥ श्रेष्ठी तद्वचनं श्रुत्वा, धृत्वा चान्तर्मुदं तदा । महाप्रसाद इत्याख्य-ल्ललाटघटिताञ्जलिः॥ १८६ ॥ धन्योऽप्यनन्यसामान्य-मनाः प्राक्कर्म निर्मितम् । निन्दन्ननिन्द्यहृद्रङ्गः, प्रागाद् गेहं जनावृतः ॥ १८७ ॥ अथ धन्यस्य निर्देशा-च्छ्रेष्ठी तुष्टमना मनाक् । तत्रानयनयत्नाय, यथाऽनुक्रमपूर्वकम् ॥ १८८ ॥ वधूचतुष्टयीं शिष्ट-श्चारकादनुवासरम् । सम्प्रेषयति सुप्रात-र्नियतं तक्रहेतवे ॥१८९॥ युग्मम् ॥ धन्यस्तु गृहमागत्य, तत्कालमतुलाशयः । स्वपत्नीं ज्ञापयामास, तक्रादानाय तद्दिने ॥ १९० ॥ प्रियादेशप्रवेशेन, शतानीकसुता मता । विशेषसुन्दरं तक्र-मवक्रवदने ददे ॥१९१॥ यतः—" यत्र क्वापि हि यत् तद् वा, दीयते वस्तु दित्सुना । तदादरसदागारं, सारं तत् स्वर्णसौरभम् ॥ १९२ ॥" पुनः कदाचित् प्रस्तावे, शस्तावेशवशंवदः । प्रियां धन्यः समाचष्ट, शिष्टात्मा सुविशेषतः ॥ १९३ ॥ हे सुभ्रु ! यदि सर्वत्र, समं सज्जनमानसम् । तथापि तन्यते तज्ज्ञै-र्गुणागुणविचारणा ॥ १९४॥ ततो यदा यदाऽभ्येति, सुभद्रेति सुभद्रभूः । तदा तदा त्वयाऽऽधेयः, स्वप्रेयःप्रणयान्वयः ॥ १९५ ॥ धन्यः पुनः प्रियां प्राह, पुण्याहसमवाक्क्रमः । जनो जानीहि मानी हि, प्रेयः सर्वः स्वमानसे ॥ १९६ ॥ तथापि श्रेष्ठिनस्तस्य, चित्रं पुत्रचतुष्टयम् । तत्पत्न्यः क्रमशस्त्वेताः, सुविनीताः परस्परम् ॥ १९७॥ सर्वासु तासु लघ्व्येषा, स्नुषा मुख्या यदा गृहे । समायाति क्रमायाति-

स्तदा मान्या त्वया प्रियम् ॥ १९८ ॥ यदा किमपि सद्वस्तु, सा पश्येत् स्पृहयालुहृत् । कञ्चुकादि तदा देयं, शाटिकाऽऽदि च कर्पटम् ॥ १९९ ॥ शालि–गोधूम–घृतमाज्यं, तथैव नैयमर्पणः । तदस्तु वस्तुतः श्लाघ्यं, यत् सतामुपयुज्यते ॥ २०० ॥ यतः—" सञ्चितं सुचितं यन्नो–पयुज्येत क्रतुष्वहे । याच्यमाने च यद् यत्नाद्, गुणवद्भ्यो न दीयते ॥ २०१ ॥ तत् कदर्यमदो द्रव्यं, रक्षितं मुख्यताऽऽस्पदम् । भुज्यते युज्यते वीरैः–चौरैः–पार्थिव–शात्रवैः ॥ २०२ ॥" इति धन्यवचोवीच्या, सिञ्चितौ-चित्यपादपा । राजपुत्री धरित्रीव, तत्फलैर्ग्रहिताऽभवत् ॥ २०३ ॥ शाटिकाऽऽद्यं तदा दत्ते, तच्चित्तेनान्वितेव सा । राजपुत्री सुभद्रायै, सुभद्रायै गुणप्रिया ॥२०४॥ यदा सा दधि घोलं च, सद्वस्त्र(वाऽ)न्यं कञ्चुकादिमत् । समानयति सन्मान्या, तदा श्रेष्ठी वदत्यदः ॥ २०५ ॥ स्नुषैषा भाग्यभागस्ति, वधूवर्गे निसर्गतः । यदाऽसौ याति तक्राय, सद्वस्त्वानयते तदा ॥ २०६ ॥ इति श्रेष्ठिवचः श्रुत्वा, स्निग्धा चान्तरुपान्ततः । शोचिरे सातिरेकास्ता, धन्यस्तिस्रोऽपि तं प्रति ॥ २०७ ॥ श्वशुर ! प्रसरत्प्रेम्णा, व्याख्यातो देवरः पुरा । विरागाग्निरगात् सोऽपि, विदेशं गतवानतः ॥ २०८ ॥ इदानीमपि सत्पत्नी, पत्नीकृत्यतरां गिरा । व्याख्याय क्षणतः क्षीणा, तदनु प्रेषयिष्यते ॥ २०९ ॥ दिवा तु क्रियते कर्म, मृत्तिकावहनं महत् । निशायां शय्यते श्रान्तं, क्षितौ क्षतवपुलेतम् ॥ २१० ॥ धूलिधूसरता धार्या, सुकुमार्याऽपि यत् तया । वर्ण्यते कर्णशूलं नो, वधूमें भाग्यभागिति ॥२११॥ तद्वाच्या मौनमासीने, श्रेष्ठिनि व्यर्थचेष्टिनि । वध्वो वारेण तक्राय, यान्त्यायान्ति च नित्यतः ॥ २१२ ॥ ततः परिचयौचित्य–प्रस्तावे प्रस्तुते सति । धन्यः प्राह सुभद्रां च, वदान्यः सदनागताम् ॥ २१३ ॥ मृगाक्ष्याख्याहि भो भद्रे !, सुभद्रे ! स्वां कथां मम । का त्वं तत्त्वतया केन, हेतुना किमिहाहिता ? ॥ २१४ ॥

इत्थं धन्योदिते सद्यः, सञ्जलज्जाऽधोमुखी । ब्रूते स्म विस्मयस्मेरं, वचस्तच्छ्रवणामृतम् ॥ २१५ ॥ दैवं पृच्छेच्छया तुच्छं, स्वच्छन्दच्छन्नवत्सलम् । किं मां पृच्छसि हे स्वच्छ !, कर्मकर्दमकच्छपीम् ? ॥ २१६ ॥ दैवमेव बलीयोऽस्तु, राज–रङ्कसमक्रमम् । यज्जगज्जन्तुसन्तानं, नटवन्नटयत् पटु ॥ २१७ ॥ शालिभद्रस्वसा साऽहं, भद्रा–गोभद्रनन्दिनी । निन्दनीया जने जज्ञे, मन्ये पुण्येन वर्जिता ॥ २१८ ॥ भवतामभिधाभाजा, वरेण श्रेष्ठिसूनुना । परिणीताऽहकं भूप !, धनपालसुतायुता ॥ २१९ ॥ कर्मणा कारणात् कस्मा–दकस्मात् कलहे सति । भ्रातृणां मत्सरोच्छे(त्से)के, सञ्जाते श्रीविशालिनि ॥ २२० ॥ मद्भर्तरि गते क्वापि, जातमीऽग्नीदृशम् । त्रिरोधो गृहकुम्भेभ्यः, पयोऽपि क्षपयेदह ! ॥ २२१ ॥ यथावृत्ते तयेत्युक्ते, निर्मुक्ते मान–साध्वसा । दध्यौ धन्यो धिना साधु, बहुरत्ना वसुन्धरा ॥ २२२ ॥ ततः पुनरपि प्रोचे, धन्यो नैपुण्यपुण्यधीः । भद्रे ! तव पतिर्यातो, दूरदेशान्तरं परम् ॥ २२३ ॥ स त्वां विना यदि क्वापि, मृतः स्यादथ जीवति । देशान्तरं नृणां प्रायः, प्रत्यूहव्यूहतावहम् ॥ २२४ ॥ कथं भर्त्रा विना तन्वि !, त्वं तिष्ठसि वियोगिनी ? । स्त्रीणां तु पतिरेवात्र, सर्वत्र सुषमासुखः ॥ २२५ ॥ यद्वद् रात्रिर्विना चन्द्रं, दिनश्रीर्दिनपादपि । शस्तैर्न शस्यतेऽत्यर्थं, तद्वत् स्त्रीर्दयिताद् ऋते ॥ २२६ ॥ ततः पतिव्रतं त्यक्त्वा, मुक्त्वाग्रहकदाग्रहम् । भुङ्क्ष्व भोगानथो मह्यं, मद्गृहे स्वामिनी भव ॥ २२७ ॥ तद्वचोऽनुचितं श्रुत्वा, साऽपि व्यापित-दुर्नयम् । वज्रघातोद्धतस्वान्त–पर्वतस्यापि सर्वतः ॥ २२८ ॥ कर्णौ पिधाय पाणिभ्या–मिभ्यसूरभ्यसूयया । दोद्दयाश्रुकुषी वक्र(क्त्र)–वक्रमोटनकृत् ततः ॥ २२९ ॥ शान्तं पापमिति प्रोच्य, शोच्यतामोचरुच्यधीः । साशङ्का पङ्कनिर्मुक्त–मदः पद्यं जगाद सा ॥ २३० ॥ उक्तं च—" गतियुगलकमेवोन्मत्तपुष्पोत्करस्य, त्रिनयनतनुपूजा चाथवा भूमिपातः । विमलकुलभवानामङ्गनानां

शरीरं, पतिकरजरजो वा सेवते समांजहः ॥ २३१ ॥" पाठान्तरम्–" गतियुगलमलं स्यात् काञ्चनद्रोः सुमानां, मनसिजरिपु-
पूजा वाऽथ पृथ्वीनिपातः । विमलकुलभवानामङ्गनानामिहाङ्गं, पतिकरजरजो वा सेवते वा हुताशः ॥ २३२ ॥" सिंहस्य केसरं
सारं, सत्याः पीनोन्नतौ स्तनौ । शरण्यं सुभटश्रेणेः, शेषस्योरुशिरोमणिम् ॥ २३३ ॥ दन्तौ दन्तावलेन्द्रस्य, सुरेन्द्रस्य करा-
शनिम् । सौरभं जीवितेशस्य, को ग्रहीतुमलं बलात् ? ॥ २३४ ॥ छिद्यतां मस्तकं यद्वा, भूयाद् वा साधुबन्धनम् । यातु लक्ष्मी-
रमा प्राणै–र्न मुञ्चेयं पतिव्रतम् ॥ २३५ ॥ धन्यः साधुरसाधुस्त्व–मादधानो धनान्धधीः । यदृच्छावाञ्छकस्तुच्छं, वदसीति
मदोध्दु(द्धु)तम् ॥ २३६ ॥ राज्यन्याय्यं परित्यज्य, मां प्रियीकर्तुमिच्छसि । पतिं विना न शक्तो मां, स्प्रष्टुं सुष्ठु शचीपतिः
॥ २३७ ॥ किं वा बहूद्यते सद्यः, स्वप्रशंसनपातकम् । सेन्द्रश्चन्द्रोऽपि नागेन्द्रो, नालं मे शीलहीलने ॥ २३८ ॥ इति तन्निश्चयं
चित्ते, निश्चित्यौचित्यसत्यतः । चमत्कृतोऽन्तरत्यन्तं, साधुः सान्त्वनमाददे ॥ २३९ ॥ धन्यः साधुरथावक् तां, भद्रे ! मा कुप्य
भद्रधीः । कारणं च शृणु श्रव्यं, विद्यते यदवद्यमुक् ॥ २४० ॥ परस्त्रीलोलुपो नाह–मात्मना हितहेतवे । व्यसनाभ्यसनो नापि,
क्वापि पापपरायणः ॥ २४१ ॥ इदं च वचनं प्रोचे, बाह्यवृत्तिप्रवृत्तितः । किन्तु मन्तुविनिर्मुक्तं, सत्त्वं तव परीक्षितम् ॥ २४२ ॥
क्षन्तव्यं तत् त्वया दक्षे !, क्षमावत्या क्षमस्वतः । परीक्षा तु सतां सत्त्व–कल्याण–कषपट्टिका ॥ २४३ ॥ त्वां पृच्छामि परं स्वच्छे !,
ब्रूहि सुभ्रु ! सविभ्रमे ! । जानासि त्वं कथं कान्तं, नितान्तस्वान्तसङ्गतम् ? ॥ २४४ ॥ किं वा कस्मादभिज्ञानाद्, दर्शनादथवा
दृशोः ? । यथा विबुध्यसे बुद्ध्या, मत्पुरस्तन्निवेदय ॥ २४५ ॥ साऽऽह साधो ! विजाने त्वां, सङ्केतेन वरं परम् । दृष्टं च
वेद्मि वा वेष–परावर्त्येऽपि साम्प्रतम् ॥ २४६ ॥ सोऽवदत् तर्हि सङ्केतं, समाकर्णय वर्णिनि ! । श्रीश्रेणिकस्य जामाता, धन्यो-

ऽभूद् धनसारभूः ॥ २४७ ॥ रात्रौ प्रियात्रयं त्यक्त्वा, तत्र राजगृहे गृहे । गात्रमात्रो विनिर्गत्य, समागादत्र चित्रदः ॥ २४८ ॥ युग्मम् ॥ सङ्केतवचनं श्रुत्वा, मत्वा प्रियमधिश्रियम् । दृशा प्रेमस्पृशा दृष्ट्वा, सुभद्रा भद्रभूरभूत् ॥ २४९ ॥ धन्यम्मन्या पतिं धन्य-मवेत्य प्रीतचेतसा । त्रपाभाववशा नम्र-वदना सा मुदं दधौ ॥ २५० ॥ चक्रवाकी यथैवार्कं, चकोरी चन्द्रमण्डलम् । मयूरी वारिदं दृष्ट्वा, हृष्टा तं वीक्ष्य सा तथा ॥ २५१ ॥ अथ वासोदरे नीत्वा, राजपुत्र्या त्रपावतीम् । धन्यः सम्मानयामास, प्रियेयं मे प्रकाश्य सः ॥ २५२ ॥ शीर्णे वस्त्रे परित्याज्य, प्राज्यहर्षप्रकर्षतः । दिव्यवस्त्राश्रिता चक्रे, शक्रेणेव शची रुचा ॥ २५३ ॥ विभूष्य भूषणश्रेण्या, वेष्माद्या पदसम्पदः । सत्कृत्य स कृती प्रोचे, त्वं गृहस्वामिनीति ताम् ॥ २५४ ॥ समजनि जनमान्यः सीतया रामचन्द्रः, सपदि च दवदन्त्या श्रीनलक्षोणिपालः । सकलसहजपूज्यः कृष्णया धर्मसूनुः, समु(सु)खसुखमिवासीत्, कान्तया धन्य एवम् ॥ २५५ ॥ इति धन्यमहापुण्य-नररत्नशिरोमणेः । जिनधर्म-जयानन्दः, प्रस्तावस्तृतीयोऽभवत् ॥ २५६ ॥

इति श्रीधन्यचरिते स्वकर्मपरीक्षार्थकौशाम्बीप्राप्ति-रत्नपरीक्षा-राज्याङ्गप्राप्ति-राजपुत्रीपरिणयन-स्व-कुटुम्बमिलन-सुभद्रोपलक्षणोपाख्यानवर्णनो नाम तृतीयः प्रस्तावः ॥ ३ ॥

अथ चतुर्थः प्रस्तावः ।

अथ सुपृथुलभाग्यश्रीप्रियाश्रीधरस्य, प्रविदितमतिजाते वल्लभातुल्ययोगे । सुषमसुखमुखस्य श्रेयसा धन्यसाधो-रपरतरकुटुम्बे यत् त्वभूत् कथ्यते तत् ॥ १ ॥ तथा चोक्तम्—" स्थाने निवासः सुकुले कलत्रं, पुत्रः पवित्रः स्वजनानुरागः । न्यायस्थवित्तं

सुहितं च चित्तं, निच्छद्मधर्मस्य सुखानि सप्त ॥ २ ॥" पुनश्च—"सविनयास्तनया दयिता हिता, नयभवो विभवो निपुणा गुणाः। वपुरनाधि समाधिरि(र)विनृणां, शुभतरोः प्रथमाङ्कुरका अमी ॥ ३ ॥" "दानेन विश्वानि वशीभवेयु–र्दानेन वैराण्यपि भङ्गभाञ्जि। परेऽपि दानेन सुबन्धवेयु–र्दानं हि सर्वव्यसनप्रणाशि ॥ ४ ॥" इतश्च श्रेष्ठिना सुष्ठु, दृष्ट्वा वर्त्मं वधूविधौ(धौ)। द्वितीयिका स्नुषोऽमापि, प्रायः शङ्कितचेतसा ॥ ५ ॥ वत्से ! विच्छेदमादाय, सुभद्रां द्राग् विलोकय। वेलाविलम्बः सञ्जातः, कुतश्चिद्धेतु–सेतुतः ॥ ६ ॥ तक्रतापनिकां लात्वा, तमुप श्वशुरेरिता। धन्यगेहमगाद् वेगात्, सुभद्रासंदिदृक्षया ॥ ७ ॥ तत्र गेहाङ्गणे गत्वा, निरीक्ष्येतस्ततः क्षणम्। स्तम्भमध्वर्युचेटीव, चिरण्टी टीकतेऽचिरम् ॥ ८ ॥ पुनर्मण्डपमध्येऽगाद्, गर्भगेहे ददे दृशौ। तत्राद्राक्षीन्मृगाक्षीं तां, दिव्याभरणधारिणीम् ॥ ९ ॥ ततः सत्वरमागत्या–ऽऽतुरचेतस्विनी सका। श्रेष्ठिने ज्ञापयामास, तं वृत्तान्तमशेषतः ॥ १० ॥ तच्छ्रुत्वा श्रवणश्रेणि–तप्तत्रपुनिभं वचः। वज्राहत इव श्रेष्ठी, पौनःपुन्येन दूनवान् ॥ ११ ॥ स किंकर्तव्यतामूढः, प्रौढोऽपि दृढधीरपि। क्षणमास्थाय विच्छाया–ऽऽशयश्चिन्तितवानिति ॥ १२ ॥ अनया कुनयाचार–वत्या हत्यासमं निशाम्। किमाचरितमाचार–परिहीनं कुलस्त्रिया ? ॥ १३ ॥ जने जन्येन धन्येन, पांशुने(ले)नेव साधुना। प्रसह्यारुह्य रागाद्रि–मपजह्रे ह्रिया विना ॥ १४ ॥ तत् सर्वं स्वकुटुम्बाय, ज्ञापयित्वा ममत्वतः। तं वृत्तान्तं द्रुतं गत्वा, व्याहरद् व्यवहारिणाम् ॥ १५ ॥ तेऽप्यूचिरे चिरेणेति, तं विमृश्य हृदा तदा। नायं कुमार्गसंसर्गी, निसर्गगुणवर्गणः ॥ १६ ॥ अद्याद्यागमतः पूर्व–मत्रस्थस्यास्य सर्वशः। दृष्ट्या न दृष्टं न श्रुत्या, श्रुतमन्यायवर्तनम् ॥ १७ ॥ युग्मम् ॥ गीतेषु गीयते चेति, परनारीसहोदरः। पुण्यवन्मानवाग्रण्यो, धन्यः साधुरहो ! महान् ॥ १८ ॥ साम्प्रतं भवता तस्ये–त्थं स्वरूपं प्ररूप्यते। विपरीतमिदं कस्मात्, कारणाद् गण्यतेऽन्वणु ? ॥ १९ ॥ तथापि ज्ञाप-

पिष्याम–स्तं गत्वा सत्त्ववत्सलम् । विनयेन नयेनापि, विज्ञप्याः स्वामिनः पुनः ॥ २० ॥ निशम्य श्रेष्ठिनं शिघ्र–वाप्यास्ते वणिजो-
ऽञ्जसा । गत्वा नत्वा च तत्राव–बोधाद् धन्यं व्यजिज्ञपन् ॥ २१ ॥ धन्यस्त्वं पुण्यनैपुण्य–पण्यताकृत्रिकापणः । विशेषाद् राज-
जामाता, माता–पित्रोः समः सताम् ॥ २२ ॥ न चेदं युज्यते पूज्य–पूजनीयस्य ते सतः । परस्त्रीहरणं शस्त्री–समं न्यायलतातते:
॥ २३ ॥ यतः—“ यदि सूर्यात् तमो भूया–च्चन्द्राच्चाग्निकणोच्चयः । समुद्रात् सीमनिर्द्राव–स्ततो लोकस्य का गतिः ? ॥ २४ ॥”
तेषामिति वचश्चञ्चच्चामराभं श्रुतिप्रियोः । श्रुत्वा बहुश्रुतः किञ्चित्, स्मित्वा चान्तरधान्मुदः ॥ २५ ॥ अशृण्वन्निव निर्वृत्या–
कारगोपनमन्तरा । वार्तान्तरं तदाऽऽरेभे, धन्यः साधोरधीश्वरः ॥ २६ ॥ ततो धन्यमनो ज्ञात्वा, तत्त्वज्ञा अपि तेऽव्रजत् । गृहं ययुः
‘स्पृहाहीना, सेवा स्वामिसुखा खलु’ ॥ २७ ॥ तत्स्वरूपं तथाऽवेत्य, चिन्तासन्तापमानसौ । स्वयं गत्वा स्वविज्ञप्ति–माधाद् धन्य-
पुरो गुरुः ॥२८॥ “दुर्बलानां बलं राजा, बालानां रोदनं बलम् । बलं मूर्खस्य मौनत्वं, तस्करस्यानृतं बलम् ॥ २९ ॥” अन्यायं
तनुते योऽन्य–स्तद्दण्डः क्रियते त्वया । तदन्यायमनादृत्य, वधूं मुञ्च ममोत्तम ! ॥ ३० ॥ ततो भिन्नमना धन्यः, पितृप्रेमसुधा-
रसैः । भटानादिश्य विस्पष्टं, श्रेष्ठिने दीयतां वधूः ॥ ३१ ॥ ततस्ते श्रेष्ठिनं श्रेष्ठ–मुपादाय तदग्रतः । सौधान्तरनयन्निद्धं, शुद्धान्त-
मिव सम्पदाम् ॥ ३२ ॥ अथोत्थाय द्रुतापाय–मह्नायेष्टस्य पृष्ट(ष्ठ)तः । गत्वा नत्वा पितुः पादौ, स प्रोचे प्राचदञ्जलिः ॥ ३३ ॥
सप्रसादैः पितृपादैः, सुधास्वादैर्विदां पदैः । क्षन्तव्यं नव्यभव्यत्वा ! मत्कृतं दुष्कृतं त्वदः ॥ ३४ ॥ इदं साधुवचः श्रुत्वो–पलक्ष्य
च सुतं स तम् । प्रोत्फुल्लवदनाम्भोजो, जज्ञे श्रेष्ठी महिष्ठमुत् ॥ ३५ ॥ हर्षप्रकर्षसंतर्ष–पर्षत्पोषितमानसः । पत्नी–पुत्रादिकं पश्चाद्,
व्यस्मार्षीत् सुरवच्च सः ॥ ३६ ॥ प्रविष्टे चोपविष्टेऽथ, मध्ये श्रेष्ठिनि सद्मनः । धन्यमाता तथैवाऽऽगाद्, रागाद् राधाविधित्सया

॥ ३७ ॥ सा तत्राक्षत्रविश्रास–माधातुं तत्पुरोऽब्रवीत् । गृहीता मद्ब्रादौ, त्वया न्यायवताऽस्तु सत् ॥ ३८ ॥ मत्कान्तोऽपि हृतः कस्मा–दमन्तुर्नन्तुमागता(तः) । तं दर्शय विमर्शार्ह ! निष्प्राणत्राणनैपुण्य(ण्य!) ॥३९॥ मानेत्थं कुमिणे प्रोक्ते, सम्पृक्ते सूक्तियुक्तिभिः । धन्यः सम्मुखमागत्य, नत्वा स्वाम्बां ननाम ताम् ॥ ४० ॥ समायाताः क्रमेणेति, भ्रातरस्ते त्रयोऽपि हि । पञ्चाङ्गाश्लिष्टप्रणामेन ते प्रत्येकं प्रणेमिरे ॥ ४१ ॥ एवं कलत्र–सत्पितृ–मातृ–भ्रातृसमागमे । धन्येन तत्रा सञ्जाते, यज्जातं तद् प्रतन्यते ॥ ४२ ॥ यदा देवरभार्या सा, श्वश्रू–श्वशुरकौ वराः । नाऽऽः कारणतोऽभूवन्, भ्रातृजायास्तदाऽऽकुलाः ॥ ४३ ॥ सर्वाः सम्भूय ता भूयो, धन्य-द्वारमथास्थिताः । पूत्कुर्वन्त्यकै राव–मिति तारं परस्परम् ॥ ४४ ॥ नियतेर्ज्ञायते नैव, किं भविष्यति दुःखदम् ? । राजसौधमिदं प्रायः, स्त्रीजनस्यास्ति दुर्गमम् ॥ ४५ ॥ संलप्येति भृशं द्वाःस्थाः, दुःस्थास्ताः करुणस्वरम् । स्थित्वा शर्म भियोद्दामं, समादुः स्वकुटीरकम् ॥ ४६ ॥ त्रियामां शतयामां वा, दुःखान्नीत्वा विषादतः । प्रभाते तास्तु सम्भूय, शतानीकसभामगुः ॥ ४७ ॥ विचित्रमन्त्रि–सामन्त–सन्धिपाल–भटोद्भटाम् । श्रेष्ठि–श्रेष्ठगुणज्येष्ठ–विशिष्टविबुधाधिकाम् ॥ ४८ ॥ किं बह्विन्द्रसभाशोभां, सभां सम्प्राप्य ताः स्त्रियः । व्यधू रावां महीन्द्राग्रे(ग्रे), धन्यान्यायविवक्षया ॥ ४९ ॥ युग्मम् । प्रतापजितमार्तण्डमण्डलद्युतिमण्डल ! । न्यायवल्लिघनाम्भोद–सोदरस्वकरोत्कर ॥५०॥ मातृपितृ[त]मस्वामि–न्नुर्वी सर्वां सुम(समु)च्चये । जीवेत्याशीर्वशाः प्रोचुः, शतानीकं तु ता वशाः ॥ ५१ ॥ चिरं विरञ्चिवज्जीव, चिरं नन्द च नन्दवत् । चिरं राज्यं भजन् स्वैरं, सुचिरं पालय प्रजाः ॥ ५२ ॥ श्रीमदा-श्रितलोकानां, कल्पद्रु–मणि–धेनुवत् । समीहितं हितं तन्वन्, सौराज्यं कुर्वखण्डितम् ॥ ५३ ॥ इत्याशीर्वचनाम्भोद–सुन्दरोदक-वृष्टिभिः । अभिषिच्य क्षमाधीशं, विज्ञप्यं ता व्यजिज्ञपन् ॥ ५४ ॥ वयं कर्मकरत्वेन, किङ्करत्वेन वा विभो ! । वित्ताभावादिहा-

याता, निरातङ्कं भवत्पुरे ॥ ५५ ॥ यत्र तत्र विचित्राणि, कृत्वा कर्माणि जीववत् । वर्तनायायतोद्योगा, देव ! वर्तामहे महत् ! ॥ ५६ ॥
धन्येन साधुना साधु, नाधुना विधिनाधिना । प्रथमं प्रथमन्दाक्षा, देवास्मद्देवरप्रिया ॥ ५७ ॥ तदनु श्वशुरः श्वश्रू–रस्मदीया वरा
वराः । वराका वा कुटुम्बाम्या, हृ(ह)तं सर्वमिदं मदात् ॥५८॥ तत् कुटुम्बमिदं मन्दं, मन्दं विश्वस्तमस्तहृत् । धारितं मारितं वाऽङ्गं,
जीवितं वाऽवितं बत ! ॥ ५९ ॥ शोधयित्वा नयाम्भोधे !, बोधयित्वा ममत्वतः । अस्माभिर्मलयानालं, लोकपालोऽसि पञ्चमः
॥ ६० ॥ युग्मम् । इत्यादि तद्वचः श्रुत्वा, श्रोतव्यं भव्यभूभृताम् । नीत्या गीत्या क्षमाध्यक्ष[ः], सामधाम स्वबन्दिनम् ॥ ६१ ॥
धन्यपार्श्वे ततो मह्यक्षु, प्रेष्य(ष्य) प्रेक्षावतां वरम् । समासात् कथयामास, मुञ्चेमान् मानुषानिति ॥ ६२ ॥ धन्यसाधुरथाऽऽह
स्म, बन्दिदं कुरिकन्दिनम् । निवेद्य गृहं गत्वा, [illegible]यमत्पुमान् ॥ ६३ ॥ करोमि चेन्निरोधेन, तर्हि किं तव भूभृता ? ।
प्रायः स्वेच्छा महेच्छानां, निरोद्धुं केन बुध्यते ? ॥ ६४ ॥ तत् सर्वमुर्वरीशाया–ऽऽगत्य बन्दी न्यवीविदत् । स्वखर्वगर्ववचनात्,
क्रोधाध्मातः क्षमाधवः ॥ ६५ ॥ शतानीकः क्षतानीकः, कृतनीकर्मकर्मठः । धन्यं जामातरमपि, शत्रुक्षत्रमिवैक्षत ॥ ६६ ॥
सैनिकान् कांश्चिदादिश्य, धन्यं हन्तुं समन्तुकम् । प्रैषी द्वेषीव तत्पेषी, भीषयन्निव दुःखलान् ॥ ६७ ॥ युग्मम् । धन्योऽपि
रोपितौचित्य–मित्यवेत्य हृदा तदा । विरोधो भूभुजा जातो, दुर्निरोधो महाधिया ॥ ६८ ॥ ततोऽहमपि सामग्री–मङ्गीकृत्य युधो-
चिताम् । तिष्ठामि शिष्टनीत्येषकोपेक्ष्यः खलु विद्विषन् ॥ ६९ ॥ ध्यात्वेति दूतैराज्ञाप्य, ग्रामपञ्चशतादतः । सुभटान् कटका-
न्वितान्, संनह्य स्थितवान् स्वयम् ॥ ७० ॥ समायाताः शतानीका–नीकयोधा महाक्रुधा । तैः सार्धं समरो जज्ञे–ऽसमरोषं शरा-
शरि ॥ ७१ ॥ धन्यः पुण्यप्रमाणावि–र्भावनाभिरभि प्रभुम् । भग्नाः पलायितुं लग्ना सुभटास्याः क्षतास्ततः ॥ ७२ ॥ भग्नं कटकमा-

वीक्ष्य, सप्टङ्काद् विकटं नृपः । स्वयं युयुत्सुरायासी–दनुदासीनविक्रमः ॥ ७३ ॥ सर्वाभिसारसंरम्भं, प्रारम्भाज्जम्भकारिवत् । धन्यं दानवमामन्त्र्य, समन्युरुदभूद् युधे ॥ ७४ ॥ गृहरक्षामतो मक्षु, कृत्वा धन्यो निजैर्भटैः । स्वसैन्यमन्यमादाय, निर्ययौ नगराद् बहिः ॥ ७५ ॥ रणक्षेत्रमथासृत्य, सुत्रामसमविक्रमौ । क्रमौचित्यं विना स्वैर–मसूत्वरचरत्वरौ ॥ ७६ ॥ राम–रावणवद् विष्णु–जरासन्धाविवोद्धुरौ । युधिष्ठिर–कुरुप्रख्या–विव मुख्यौ विशेषतः ॥ ७७ ॥ कल्पान्तभ्रान्तपाथस्का–विव वार्धी परापरौ । वीक्ष्य दक्ष्यविलक्ष्याक्षा वीक्षाऽऽपन्ना इवाभवन् ॥ ७८ ॥ किं भावि भवितव्येन, द्वयो राजन्य–धन्ययोः । किङ्कर्तव्यतया मूढाः, प्रौढा इति डुढौकिरे ॥ ७९ ॥ चतुर्भिः कलापकम् । अत्रान्तरे वरामात्यै–रेत्य जात्यैर्धियेद्धया । परस्परं विमृश्याशु, विज्ञप्तं भूपतेः पुरः ॥८०॥ हे नाथ ! न्यायपाथोधे !, दीर्घदर्शिशिरोमणे ! । जामात्राऽमात्र।(त्र)तः सत्रा, न युद्धं युद्ध्यते तव ॥ ८१ ॥ धन्यस्त्वद्दुहितुः प्रेयां–स्त्वयाऽतीवाश्रित मानितः । वर्धितो वृक्षवद् दाक्ष्यात्, स्वयं छेत्तुमसाम्प्रतम् ॥ ८२ ॥ नाप्ययं दुर्णयाभ्यर्णः, कदाचिदपि दृश्यते । धीनिधिस्तु स्वयं शश्व–न्मर्यादायादसम्पतिः ॥ ८३ ॥ कारणं गण्यते किञ्चित्, स्त्रीणां पार्श्वे तु पृच्छ्यते । विचित्राश्चित्रदाः प्रायो, गतयः कर्ममर्मणा ॥ ८४ ॥ अथामात्यैर्नृपाज्ञप्त्या, गत्वा पृष्टास्तकाः स्त्रियः । धन्याह्वः स्वजनो बन्धु–र्देवरो वाऽस्ति कश्चन ? ॥ ८५ ॥ प्रोचुस्ता देवरोऽस्माकं, पुरा धन्याभिधोऽभवत् । गृहान्निर्गत्य कुत्रापि, मृतो वाऽथ स जीवति ॥ ८६ ॥ धीसखैः प्रोचिरे तास्तु, लक्षणं वित्थ तस्य किम् ? । देहजं स्नेहजं वाऽपि, येन स प्रकटो भवेत् ॥८७॥ प्राहुस्ता देवरो नः स, बालोऽभूत् पुरा यदा । तदा प्रक्षालनाद् दृष्टौ, पद्माङ्कौ तत्पदौ मुदा ॥ ८८ ॥ मन्त्रिभिश्च ततः प्रोचे, चिह्नेक्षाहेतुनाऽधुना ।

प्रक्षाल्यैतां पुनः पादौ, देवरो विद्यते यथा ॥ ८९ ॥ ततः सरोवरं जग्मुः, साकं ता मन्त्रिभिर्द्रुतम्। धन्योऽप्याकारितस्तत्र, बहु विज्ञप्य सत्वरम् ॥९०॥ भ्रातृजाया भृतायाया वीक्ष्य धन्योऽनमत् पुरा । गिरा सुधाकिरा ताश्च, भाषते स्म सुभाषणः ॥९१॥ किमर्थमागता यूयं, किमस्माभिः प्रयोजनम् ? । विनाऽर्थं कोऽपि नायाति, नाकारयति कश्चन ॥ ९२ ॥ प्रोचुस्ता देवरोऽस्माकं, प्राणेभ्योऽप्यतिवल्लभः । न प्रीणयसि नः कस्मात् , पूर्ववन्नर्मसम्पदा ? ॥ ९३ ॥ धन्योऽवक् किं भ्रमो वोऽत्र, किं वा चित्तविपर्ययः? । गार्थल्यग्रथना वाऽस्तु, वस्तु स्त्रीत्वस्वभावतः ? ॥ ९४ ॥ योऽतिप्रीतोऽस्ति वो धन्यः, स त्वन्यो मन्यतां ननु । श्रुतो राजगृहेशस्य, सुतापतिरिति श्रुतिः ॥ ९५ ॥ तास्तिस्रोऽपि पुनः प्रोचु-रुच्चैर्वचनाश्चनाः । स नु(तु) विज्ञायतेऽस्माभि-र्लक्षणेन विचक्षणः ॥ ९६ ॥ लक्षणं लक्ष्यते मुख्यं, देवरस्य क्रमाम्बुजे । तत् तत् प्रक्षाल्य ते भक्त्या, ज्ञास्यामो निजदेवरम् ॥ ९७ ॥ धन्यः प्रोचे परस्त्रीणां, स्पर्शः पातकजातकृत् । सत्रा परस्त्रिया नाहं, भाषे का स्पर्शसंकथा ? ॥ ९८ ॥ तेनेत्युक्ते ह्रिया व्यक्ते, तास्तूष्णीमालम्बिरे । परायत्ते पुनर्यत्ने, किं करोति महानह ? ॥ ९९ ॥ मन्त्रिभिस्तु धिया बुद्ध्वा, परमार्थपरिस्पृशा । स एव देवरोऽस्त्यासां-भेष वेषान्तरापरः ॥ १०० ॥ मन्त्रिणस्तमथ प्रोचु-र्धन्यमन्येतरं गिरा । मा खेदय दयापाद !, भ्रातृजाया निजा मुधा ॥ १०१ ॥ इत्याधमात्यसम्प्रोक्ते, स्नेहार्द्रः स्वयमप्ययम् । तदा स्वं विदितीकृत्य, भ्रातृपत्नीर्ननाम सः ॥ १०२ ॥ सहसा मधुरोदार-गिरा प्रीतिकिरा चिरात् । समानन्द्य तदाऽऽशु स्वं, मन्दिरं प्रैषयत् खलु ॥ १०३ ॥ अथ सैन्यसमारम्भ-प्रारम्भं प्रोज्झ्य तत्परः । नृपं प्रत्याययौ प्रीत्या-ऽऽयत्या विनयवामनः ॥ १०४ ॥ राजाऽप्याजावुपा(दा)सीनो, धन्यमुद्वीक्ष्य दक्षिणम् । सिंहासनार्धदानादि, दत्त्वा गौरवगौरवम् ॥ १०५ ॥ जगाद सादरं सद्यः, सुधास्वादास्पदं पदम् । ' सन्तो हि सत्समायोगेऽ-पयोगे मधुरा गिरा '

॥ १०६ ॥ युग्मम् । धन्यसाधो ! प्रिय साधो !, सुन्दरेण वरेण च । भ्रातृजायास्त्वयाऽपायाः, खेदिताः सुचिरं किमु ? ॥१०७॥
धन्योऽप्योचद् वचस्तथ्यं, पथ्यं राज्ञः पुरः परम् । श्रूयतामवनीनेतः !, सर्वसाधारणं वचः ॥ १०८ ॥ " बन्धूनां स्नेहन-
द्धानां, च्युतिर्नारीं विना न वै । तालकं यद् द्विधाऽऽदध्यात्, कुञ्चिकाऽन्तरुपाश्रिता ॥ १०९ ॥ " ' स्त्रीणां दुर्वचनैर्देव !,
स्युर्द्विधा बान्धवा जवात् । ' तत्परीक्षेच्छया भ्रातृ–जायास्त्वाखेदिताः खलु ॥ ११० ॥ यथा—" स्त्रीणां कृते भ्रातृयुगस्य भेदः,
संभिन्नभेदे स्त्रिय एव मूलम् । यमास्तकाले बहवो नरेन्द्राः, नारीभिरुच्छेदितराजवंशाः ॥ १११ ॥ " परमेता मम भ्रातृ–कान्ताः
शान्तवचोऽश्रिताः । न कदापि द्विधाऽऽधायि, यचोऽप्योचन् परस्परम् ॥ ११२ ॥ " परीक्षितं हि सद्वस्तु, क्षमते क्षेममक्षतम् ।
अतो नराश्च नार्यश्च, सुपरीक्ष्या विचक्षणैः ॥ ११३ ॥ " इत्याद्यासादितासाद–प्रीतिर्संवादसादरौ । तस्थतुः क्षितिभृद्–धन्या–
वन्योऽन्यं मान्यतामितौ ॥ ११४ ॥ विसृज्याथ कृतार्थं तं, धन्यं स्वावासवस्तुने । स्वयं स्वान्तःपुरं प्राप, हर्षोत्कर्षसुखो नृपः
॥ ११५ ॥ धन्योऽपि धाम चागत्य, नत्वा नत्वा यथोचितम् । तातादिकांस्तदा सर्वा–नतिप्रीताशयस्ततः ॥ ११६ ॥ पप्रच्छा-
तुच्छवात्सल्यं, वृत्तान्तं भूतपूर्वकम् । पुरातननिकेतस्थं, प्राञ्जलिर्लुलितालिकः ॥ ११७ ॥ युग्मम् । प्राह श्रेष्ठी गुणज्येष्ठ !, श्रूयतां
वत्स ! वत्सल ! । तदा विनिर्गतेऽकस्मात्, सधनस्त्वयि सत्वरम् ॥ ११८ ॥ जामातृस्नेहसम्मोहात्, सद्मछद्म प्रकल्प्य च । कुपितो
नृपतिः क्षिप्तं(प्रं), श्रेणिकः स्वजनोऽपि सः ॥ ११९ ॥ सर्वस्वं जगृहे हन्त !, गृहार्थं च तदा नृपः । ' किमभाग्योदये पुंसां,
विपरीतं न जायते ? ' ॥ १२० ॥ यदुक्तं च—" पल्लवं ज्वलति शुष्यति शाखी, मर्मरं वपुषि वर्षति चन्द्रः । वासरः सृजति
रात्रिविभागं, भाग्यभङ्गसमये हि जनस्य ॥ १२१ ॥ " जल–स्थलगतं द्रव्यं, व्यवहारोचितं यतम् । कलान्तरगतं यच्च, तद् विनष्ट-

मधिष्ठतः ॥ १२२ ॥ देशे देशान्तरे चापि, यदभूद् भीतिहेतुकम् । तत् सर्वं श्रुतिवद् वाता–दुङ्डीनं कर्ममर्मणः ॥ १२३ ॥
युग्मम् । दरिद्रे क्षुद्रतासान्द्रे, समुद्रेकात् समागते । गृहे मुद्रामथादत्य, निराकृत्यान्यकृत्यताम् ॥ १२४ ॥ रजनीं व्यञ्जनीकृत्य,
स्वजनादिविनादितः । निर्गत्याखकुटुम्बोऽपि, समायातोऽत्र सत्रपम् ॥ १२५ ॥ अत्रायाते यथा जाते, वर्तना–वृत्तिवृत्तये ।
तत् सर्वं भवता वत्स !, ज्ञायते ज्ञाप्यते किमु ? ॥ १२६ ॥ धन्योऽसामान्यसौजन्य–पाञ्चजन्यजनार्दनः । यत्कारात्र सभायः,
श्रूयतां कथ्यते हि तत् ॥ १२७ ॥ त्रयाणामपि बन्धूनां, सिन्धूनामिव चन्द्रमाः । ग्रामपञ्चशतीवेला–विलासमतनोत् स तु
॥ १२८ ॥ गृहसारं तदाऽपारं, पारम्पर्यागतः पितुः । तत् सर्वं [illegible] ॥ १२९ ॥ इति द्वयेऽपि
संरोप्य, कार्यभारमनारतम् । पत्नीद्वैतयुतस्तस्मा–न्मुत्कलाप्य नृपादिकान् ॥ १३० ॥ प्रति राजगृहद्रङ्गं, सद्रङ्गं प्रचचाल च ।
सुखेन चतुरङ्गेन, सैन्याङ्गेन सुसङ्गतः ॥ १३१ ॥ क्रमाद् राजगृहासन्न–सीमामासाद्य वाच्यतः । वर्धापन्या सुवर्धाप्य, श्रीश्रेणि-
कमहीमता ॥ १३२ ॥ महेन महता धन्यः, प्रवेशनपुरस्सरम् । पुरं प्रवेशितः सीता–पतिवत् पौरवीक्षितः ॥ १३३ ॥ युग्मम् ।
दानमानविधानेन, प्रधानेन धनर्द्धिभिः । स प्रजा रञ्जयामास, प्रजारञ्जनको निजाः ॥१३४॥ तत्रस्थः सुस्थितात्माऽथ,(य)मनपायमया-
यतिः (महेभ्यैरभिढौकिताः) । परिणिन्ये पुनर्धन्य–श्चतस्रः कन्यकोत्तमाः॥१३५॥ रूप–लावण्य–लक्ष्मीभिः, समुद्राभाः समुद्रया ।
कलाकेलिकलाकेलि–कलाः कलिकलाधराः ॥१३६ ॥ बन्धुराबन्धुरा बन्धु–राजिता राजिताः श्रिया । महोत्सवमहोलभे, शुभलग्ने
सुखार्थतः ॥ १३७ ॥ त्रिभिर्विशेषकम् । प्रियाष्टकयुतो धन्यः, शोभते स सुनिस्सपम् । भूमुनःस्वस्त्रयीस्वामी, हरिवद् भरितः
श्रिया ॥ १३८ ॥ तत्पत्न्यष्टकसंविष्ठा–भोगसंयोगयोगभृः । धन्यः सुखोद्धिं लेभे, दोगुन्दकसुरेश्वरः ॥ १३९ ॥ धन्यस्य

धननाथस्य, यथार्थस्वामिधाभुजः । ऐश्वर्यस्य धनोऽस्य, सङ्ख्या नाख्यायि मुख्यतः ॥ १४० ॥ यस्य धर्मोऽस्ति विस्तीर्ण–दीर्णः पूर्वभवार्जितः । स सर्वेभ्यो महेभ्यः स्याद्, 'यतो धर्मस्ततो जयः' ॥ १४१ ॥ यदि जिह्वाऽयुतं तु स्याद्, वदने सदने गिराम् । अमरायुर्गिरां पत्यु–र्मतिर्निर्भवभासुरम् ॥ १४२ ॥ प्रमादमदमुच्छिद्य, सद्विद्याविदुरस्ततः तद् धन्यपुण्यसौख्यस्यां, वर्णयेयं सुनिर्णयम् ॥ १४३ ॥ युग्मम् । किं वर्ण्यते सकर्णस्य, धन्यस्य स्पर्धिवैभवम् ? सौभाग्यश्रीर्धनश्रीश्च, सौख्यश्रीर्मिश्रतामधात् (वेणिवद् गुणैः) ॥१४४॥ कर्पूरः पूरताम्बूले,चन्दने स्वर्णवर्णिका । रत्नं हेम्नि सिता क्षीरे, धन्ये पुण्यं तथाऽद्भुतम् ॥ १४५ ॥ एवं धन्यस्य सत्यार्थ–नाम्नः पुण्यस्य नैपुणात् । प्रयाति कालः श्रेयःश्री–मिश्रीकरणकर्मठः ॥ १४६ ॥ ये वत्सदेशग्रामेषु, भ्रातरस्तन्नियोगिनः । ते यथा जज्ञिरे व्यर्था–स्तत्स्वरूपं प्ररूप्यते ॥ १४७ ॥ इतो धन्याग्रजन्मानः, सन्माना दुर्मदिष्णवः । धनाढ्या ग्रामभूदाढ्याः, श्रीदर्पिष्ठास्त्वबीभवन् ॥ १४८ ॥ तद्ग्रामेषु समग्रेषु, निजाज्ञां ते त्ववीवृतन् । 'सत्यं न जानतेऽज्ञानाः, खादन्तः खादितुं न वै' ॥ १४९ ॥ घनाघनो घनोऽथाभूत्, समग्रे वत्सनीवृति । ग्रामपञ्चशतीं त्यक्त्वा, तदाज्ञां विशवीमितः ॥ १५० ॥ तद्भाग्यनियोगेन, वियोगेन शुभश्रियाम् । नाभूद् वर्षाप्रवर्षोऽत्र, 'भाग्याधीना घना ननु' ॥ १५१ ॥ सल्लोका वृष्ट्यभावेन, दुःस्वभावेन सम्पदाम् । विमनस्कास्तिरस्कार–भाजो वाऽप्यभवंस्तदा ॥ १५२ ॥ तद्ग्रामा-नस्वजीवातून्, जन्तूनिव दुरात्मनः । प्रोज्झ्य ग्रामान्तरानागुः 'ते देशा यत्र जीव्यते' ॥ १५३ ॥ अनिष्पन्नेषु, भिन्नेषु, तेषु ग्रामेषु सर्वथा । तेऽभवन् निर्धना धन्य–बन्धवो विधवोपमाः ॥१५४॥ तेऽगुस्तातमथोद्विग्ना, भग्नाशा विशशाशयाः । पित्रा तिर-स्कृता 'भाग्य–मङ्गादङ्गिविपर्ययः' ॥ १५५ ॥ लज्जासज्जास्ततो ते तु, हेतुहीना विना घनात् । मालवं मण्डलं जग्मुः, सक्षुधां

शरणं स यत् ॥ १५६ ॥ आजीविकामथाधातुं, विधातुं कर्मनिर्मितिम् । वृषभान् वाहयन्तस्ते, ग्रामाद् ग्रामे पुरात् पुरे ॥ १५७ ॥
भ्रमन्तः परितो भ्रष्टा, विनष्टाशा ह्यनिष्टया । निर्भाग्याः सन्ति लाभाय, लोभभाजोऽभितो ध्रुवम् ॥ १५८ ॥ तेऽथान्यदा मुदाऽपेता,
लाभार्थग्रन्थिताशयाः । वाणिज्यव्याजतास्थित्यै, कृत्यै तूद्यतचेतसः ॥ १५९ ॥ गोधूमधान्यपण्येन, पोटिकान् वृषभान् निधि । भृत्वा राजगृहं
जग्मुः, 'किं दूरं व्यवसायिनाम् ?' (वाणिज्यार्थमभीप्सकाः) ॥ १६० ॥ चतुष्पथमथास्थाय, स्थापयित्वा स्वपोटिकान् । विक्रीणन्ति
पणीकृत्य, तत्कणानां क्रयाणकम् ॥ १६१ ॥ दैवादवसरे त्वस्मि-न्नकस्माद् विस्मयस्मयः । महोच्च(त्तु)ङ्गाश्वमारूढः, प्रौढः परिवृढो
दृढः ॥ १६२ ॥ सोद्रेकानेकसच्छेक-सुविवेकजनावृतः । तत्रायातः श्रिया ख्यातो, धन्यः क्षितिपवेश्मतः ॥ १६३ ॥ युग्मम् ।
धन्यसत्कां श्रियं श्रेष्ठां, वीक्ष्योद्वीक्ष्य च नागराः । तद्बन्धूनां तमोभूना-मिव नीचैर्गतत्विषाम् ॥ १६४ ॥ लोकाः परस्परं प्रोचु-
रुच्चकैरेव केवलम् । दैवेनाहो ! कृतं कस्मा-दन्तरं बान्धवेष्वपि ? ॥ १६५ ॥ युग्मम् । 'न कोऽपि प्रतिमल्लोऽस्ति, दैवस्यावश्यमस्य
हि । ततो बलीय एवात्र, दैवमेव न चापरम्' ॥ १६६ ॥ क्व धन्यः पुण्यनैपुण्य-शाश्वजन्यसरित्पतिः ! । क्वैते तद्भ्रातरो दौस्थ्या-
ऽवस्थावस्था व्यवस्थया ? ॥ १६७ ॥ जनश्रुतिमिति श्रुत्वा, धन्यः श्रव्यां बहुश्रुतः । प्रविलोक्योपलक्ष्यापि, दक्षत्वाद् बान्धवांस्त-
कान् ॥ १६८ ॥ विनीतस्तुरगात् तूर्णं, समुत्तीर्य समुत् ततः । स्वभ्रातृपादयोर्धन्यः, पपात ख्याततद्गुणः ॥ १६९ ॥ 'सन्तु
सन्तस्तु ते सन्ति, बहवः क्षितिमण्डले । ये ह्यसत्स्वपि सन्तः स्यु-स्ते द्वित्रा धन्यसन्निभाः' ॥ १७० ॥ लज्जिता भ्रातरोऽत्यर्थं,
धन्यं दृष्ट्वोपलक्ष्य ते । मौनमादद्रिरेऽमन्दं, लज्जाभाजां सदिङ्गितम् ॥ १७१ ॥ धन्यो महान् महाभक्त्या, युक्त्या सन्मान्य बान्ध-
वान् । गृहीत्वा गृहमानेषी, मनीषी हि करोत्यदः ॥ १७२ ॥ तान् प्रति प्रकृतिप्रीति-वचसाऽवीवदत् मुदा । पूज्या मे ह्यद्य-

न्धुत्वाद, भवन्तो हि भवन्ति यत् ॥ १७३ ॥ लक्ष्मीरेषा गृहमदः, प्रभुत्वमतिभूतिभृत् । सर्वं मे भवदायत्तं, विलसन्तु लसन्तु च ॥ १७४ ॥ ' विस्तीर्णाऽपि न सा लक्ष्मी-र्लक्षणीया विचक्षणैः । भूयो भूयोऽपि सम्भूय, भुज्यते या न बन्धुभिः ॥ १७५ ॥ " " नीचतिर्यञ्चोऽपि प्रायो, वर्णनीयो मनस्विनाम् । काकोऽपि रोचितो नीच-जातिजोऽपि विशिष्यते ॥ १७६ ॥ " एवं धन्योदिते सद्यः, प्राप्तप्रीतिसुचेतसः । कियन्तो वासरानारात्, सधन्यास्तेऽवतस्थिरे ॥ १७७ ॥ इत्थं कियत्सु घस्रेषु, सुखमिश्रेषु मुख्यतः । व्रजत्सु सत्सु ते भूयः, प्रेरिताः प्राक्तकर्मणा ॥ १७८ ॥ प्रोचुर्नीचैर्मतित्वेन, विजनेऽसज्जनत्वतः । पृथग्भूय वयं धन्य !, त्वत्तः स्थास्याम इत्यलम् ॥ १७९ ॥ " स्वस्ववेश्म समाश्रित्य, स्वस्वकृत्याकुलात्मभिः । बान्धवैरप्यवस्थेय-मिति न्याय्यं सतां मतम् ॥ १८० ॥ " ततो धन्योऽस्तदौर्जन्यो-ऽन्योन्यं बन्धुभिरभ्यधात् । नाहं स्वजिह्वया प्रह्वो, वदामीदं भवत्पुरः ॥१८१॥ यूयं वृद्धा गुणिस्पर्धा-श्रद्धावन्तो यदृच्छया । प्रकुर्वन्तु ततः सर्वं, कार्यं यद् रोचतेऽत्र वः ॥ १८२ ॥ पुनः किमपि संस्मृत्य, धन्यः कृत्यकृतां वरः । तुर्यभागं धनं दत्त्वा, मह्यं यातमथान्तरम् ॥ १८३ ॥ श्रुत्वेति धन्यसत्कोक्तं, हृत्कवच्छ्रुतिसौख्यदम् ॥ पृथग्भावकृतेऽत्यर्थं, त्वरन्ते स्मातिसत्वरम् ॥ १८४ ॥ भागत्रयं स्वसात् कृत्वा, साक्षात्कृत्वा निजोदितम् । भागे भागे तदायाताः, स्वर्णकोट्यश्चतुर्दश ॥ १८५ ॥ यदा तद्भ्रातृभिश्चक्रे, पृथग्भावविभावना । पदपश्चात् तदा कोट्यो-ऽभवंस्तेषामशेषतः ॥ १८६ ॥ घटितस्वर्ण-रूप्यादि-रत्नवस्तु समस्ततः । पट्टकूलादि तत्सङ्ख्यां, नाख्यात् सङ्ख्यावतां वरः ॥१८७॥ युग्मम् ॥ " द्वित्रास्ते पुरुषा धाम्यां, चित्रदाः सचरित्रतः । दीयमानमपि प्रायो, ये नेच्छन्ति महेच्छया ॥१८८॥ " "बहवस्ते नराभासा, न भासन्ते क्षितेस्तले । स्वकीयं

परकीयं वा, सर्वं लातुमतित्वराः ॥१८९॥" पश्यन्तु सन्तस्तेऽवश्यं, कर्मनिर्माणमुल्वणम् । तादृशो निःस्पृहो धन्यः, सुस्पृहास्तस्य बान्धवः ॥१९०॥ भ्रातरः स्वर्णमादाय, कदाशयवदाशया । यातुं स्ववेश्मविस्मेरा–स्त्वरन्ते सात्विकभ्रमलाः ॥ १९१ ॥ तद्दत्तं वित्तमादाय, मदान्धा इव दुर्धियः । द्वारसीम्नि ययुः स्वैर–चारिणो दुरितारिताः ॥ १९२ ॥ तावत् तदात्तवित्ताधि–ष्ठायकैर्यक्षनायकैः । साधकैरिव ते रुद्धा, विद्धात्मानः पुनः पुनः ॥१९३॥ युग्मम् । भाग्यभङ्गीविनाभूता, हाहाकृता यतस्ततः । व्यावृत्य विगलद्वृत्ता, धन्यं शरणमाश्रयन् ॥ १९४ ॥ स्त्र[कर्षेण ततस्ते तु], गर्वसर्वस्वदुर्विधाः । धन्यं प्रति गताशुण्यं, बान्धवास्ते बभाषिरे ॥१९५॥ शृणु धन्य ! महापुण्य–पण्यनैपुण्यपण्यवन् ! । पुरा सूक्ष्ममपि स्पष्टं, दृष्टं ते भाग्यमद्भुतम् ॥ १९६ ॥ एतावन्ति दिनान्येवं, मत्सरः कुत्सितेच्छुभिः । त्वयाऽमाऽस्माभिरिभ्येन, प्रारेभेऽनर्थमर्थिभिः ॥ १९७ ॥ " परं यदि खला न स्यु–र्चपलाः शूकलाः कलौ । कथं ततः प्रथीयांसः, सज्जनाः स्युर्जनार्चिताः ? ॥ १९८ ॥ " सतां प्रियकृतां मध्ये, त्वं सीमाऽसीममानदः । असतामसतामन्ताः, सीमानो वयमेव नु ॥ १९९ ॥ गुणागुणगुणैस्त्वं च, वयं च यदि सोदराः । दध्यामहे महेन्द्रेणो–द्यामहे धरणेन वा ॥ २०० ॥ परं सर्वोऽपि गर्वेण, मानवो भ्रश्यते वृथा । ' कर्मैव बलवन्नृणां, स्त्रीणामपि शुभाशुभम् ' ॥ २०१ ॥ ' भुज्यते भुज्यते चापि, निजोपार्जितमूर्जितम् । सर्वैरपि जगज्जन्तु–जातैरि'ति कृतं गिरा ॥ २०२ ॥ तेऽस्मिनन्ध तदा सद्य, इत्याधात्मानमात्मना । कर्मणां दूषणं दत्त्वा, धन्यपादौ ववन्दिरे ॥२०३॥ धन्योऽथ पृथु सम्मान्य, पौनःपुण्ये(न्ये)न पुण्यवान् । सचकार सदाकारः, कृपाऽऽधारः स्वसोदरान् ॥ २०४ ॥ धन्येनेति कृतज्ञेन, भ्रातरः सान्त्वनादिताः । सम्प्रीणितास्तथा सर्व–प्रकारैः सुखिनो यथा ॥ २०५ ॥ तेऽथ पार्थक्यमुत्सृज्य, धन्ये पयसि वारिवत् । माधुर्यधुर्यतामाधु–रौज्ज्वल्यं च प्रसक्तराः ॥ २०६ ॥ सम्मुखेन सुखेनेति, तेऽथ धन्येन

सञ्जाताः । कालं बहुमपि प्रीता, मुहूर्तमिव मेनिरे ॥ २०७ ॥ देवपूजा–नमस्कार–स्मृति–वन्दनकर्मभिः । पौषधावश्यकाभ्यां च, कालसाफल्यमादधुः ॥ २०८ ॥ क्रमाच्छ्रेष्ठ्यपि तच्छ्रुत्वा, पुत्रैकत्रनिवासिताम् । द्रुतं तमा(त्रा)गतस्तूर्णम्, ' अविरोधः सतां मतः ' ॥ २०९ ॥ सकलत्राश्चतुष्पुत्राः, सकलत्राः समागमन् । प्रणमंश्च निजं तातं, समातरमतः परम् ॥ २१० ॥ वृद्धावस्थागृहागृद्धौ, तन्माता–पितरावुभौ । सुतानां सन्निधेर्धर्म–पाथेयाय प्रयत्नतौ ॥ २११ ॥ प्रान्ताराधनमाधाय, विधिवच्छुद्धसद्धिया । समाहिता–वनशना–दुत्तमां गतिमापतुः ॥ २१२ ॥ इति सकलकुटुम्बाडम्बरोड्डप्रकाण्डः, सुविशदपदकीर्तिस्फूर्तिको भूरिदारः । सुषमतमसु–सश्रीपूर्णमावासमन्द्रः, कुमुदमविदधाति प्रीणनं धन्यचन्द्रः ॥ २१३ ॥ इति धन्यमहापुण्य–नररत्नशिरोमणेः । जिनधर्म–जयानन्दः, प्रस्तावस्तुर्यकोऽभवत् ॥ २१४ ॥

इति श्रीधन्यचरिते स्वकुटुम्बमिलन–भ्रातृजायापरीक्षण–भ्रातृग्रामपञ्चशतीदान–पुना राजगृहप्राप्ति–चतुरिभ्यसुतापरिणयन–पुनर्भ्रातृसमागम–विरोधनिरोधैकत्रस्थान–धर्मकरणवर्णनो नाम चतुर्थः प्रस्तावः ॥ ४ ॥

अथ पञ्चमः प्रस्तावः ।

" स्थाने वासः सुकुलममलं शीलपात्रं कलत्रम्, पुत्रो मित्रोचितगुणगणः सज्जनार्यानुरागः । न्यायस्थेयः सदयहृदयं वि(चि)–त्तसौहित्यमेत–न्निश्चलत्वप्रविदितमते कथ्यते सप्तसौख्यम् ॥ १ ॥ " " सुविवेकः संवेगः सद्गुरुसङ्गः कषायहीनत्वम् । पात्रे

श्रद्धा-दानं, न भवन्ति स्तोकपुण्यानाम् ॥ २ ॥ " धन्यस्य सर्वस्वभ्रातृ-मैत्र्यैकक्ष्यमुपेयुषः । यत् पुनः शुभमुद्भूतं, तदशेषं प्रकाश्यते ॥ ३ ॥ अथान्यदाऽप्ययावत्र, पुरे प्रवरसंवरः । चतुर्ज्ञानधरो दान्तः, क्षमा-नु(मु)क्ताविविक्तिमः ॥ ४ ॥ दानधर्मोदिता-भान्त-मधुव्रतकृतप्रियः । साधुपञ्चशतीयूथ-प्रथितः सद्गतिस्थितिः ॥ ५ ॥ विवेक-सेना-शृङ्गारः, सारसद्धर्म-सत्क्रमः । धर्म-घोषाभिधः सूरि-सिन्धुरो बन्धुरोदयः ॥ ६ ॥ त्रिभिर्विशेषकम् ॥ तं तत्रायातमाकर्ण्य, कर्णामृतमिवाहतम् । धन्यः सभ्रातृको हर्षो-त्कर्षवर्षाम्बुदोऽभवत् ॥ ७ ॥ महोत्सवमिहाकल्य, नितान्तोत्तमदानतः । स भ्रातृत्रितयोपेतो-ऽभवद् वन्दितुमुद्यतः ॥ ८ ॥ कुटुम्बाडम्बर-भ्रातृ-जाया-जायाष्टकान्वितः । वन्दितुं प्रययौ धन्यो, ' धर्मस्य त्वरिता गतिः ' ॥ ९ ॥ भक्तियुक्ति गुरुं नत्वा, तत्त्वाभीप्सुतया तदा । प्रतिपत्तिपुरस्काराद् , धन्यश्चाग्रेऽस्य तस्थिवान् ॥ १० ॥ अशङ्कमप्रष्टमुपक्र-मिश्रमानम्य सद्गुरुम् । धन्यः शुश्रूषुरास्ते स्म, ललाटघटिताञ्जलिः ॥ ११ ॥ " उरसा शिरसा दृष्ट्या, वचसा मनसा धिया । पद्भ्यामथ कराभ्यां वा, प्रणामोऽष्टाङ्ग उच्यते ॥१२॥ " तद्भ्रातरोऽपि चारोध(ध्य) श्रद्धां मनसि साञ्जसम् । गुरोरुपाविशन्नग्रे, देशनां श्रोतुमिच्छवः ॥ १३ ॥ धर्मघोषाभिधः सूरि-र्धर्मघोषान्विशोऽब्दवत् । भृशं ताण्डवयामास, सोल्लासं भव्य-केकिनः ॥ १४ ॥ भो भव्याः ! शृणुत भव्यां, देशनां क्लेशनाशिनीम् । चतुर्मुखजिनाधीश-शस्तामस्तभवभ्रमाम् ॥ १५ ॥ " देयं दानं हृदः शुद्ध्या, सुपात्रे ऽमात्रभावतः ॥ शीलं शील्यमिह श्लीलं, कीलं मोहमहीशितुः ॥ १६ ॥ तपस्तप्यं तमः क्षय्यं, यथाशक्ति प्रशक्तितः । भाव्यो भवाभाव्यो, धर्मोऽस्त्येष चतुर्विधः ॥ १७ ॥ धर्मं चतुर्विधं शुद्धं, बालाबालाश्च ये नराः । दुःस्था वा यदि वा सुस्थाः,

कुर्युस्ते स्युः शिवास्पदम् ॥ १८ ॥ पुनर्मुनिवरः प्राह, महाघोषविधित्सया । पृच्छया श्राद्धधर्मस्थ–धन्यादीनामिदं मुदे ॥१९॥ दानपुण्यवनप्राश्वत–सेचनाम्बुधरोद्धराम् । व्याख्याद् विख्यातिमुत्सङ्गां, मृगाङ्कस्य कथामथ ॥ २० ॥

तथाहि महिमाऽऽकीर्ण–दानश्रद्धानशोभिना । श्रूयतां श्रवणश्रेणी–श्रव्या तस्य कथा प्रथा ॥ २१ ॥ संसाराम्बुधियाने, दानं ददतेऽत्र ये सुपात्रेभ्यः । ते नर–सुर–शिव–सौख्यं, सुलभन्ते हंसपाल इव ॥ २२ ॥ वाराणसी वरा पुरी, मकरध्वजभूपभः । तत्र चित्रदसम्पद्वान् , श्रेष्ठी सन्मकरध्वजः ॥ २३ ॥ तस्य स्वयंप्रभेत्याख्या, श्रेष्ठिनी श्रेष्ठचेष्टिता । तत्पुत्रोऽभून्मृगाङ्काह्वः, प्रह्वः पित्रोरविह्वलः ॥ २४ ॥ तं बाल्येऽध्यापनार्थायो–पाध्यायायार्पयत् पिता । ' तौ माता–पितरौ सत्यौ, यौ स्वं पाठयतः सुतम् ' ॥ २५ ॥ इतश्च नगरेऽत्रास्ति, श्रेष्ठिशिष्टो धनञ्जयः । तदङ्गजा प्रजासञ्ज्ञा, पद्मावत्यस्ति शस्तधीः ॥ २६ ॥ तत्रैव दिवसे साऽपि, प्रापिताऽध्ययनधेये । ' पुत्रिकाऽपि तु पितृभ्यां, प्रायोऽध्याप्या श्रिये धिये ॥ २७ ॥ ' तयोश्च तुल्यशोबाल्य–गुण–रूप–वयः–श्रिया । साक्षात सख्यमभून्मुख्यं, ज्योत्स्ना–ज्योत्स्नावतोरिव ॥ २८ ॥ खाद्यं स्वाद्यं तथा भोज्यं, पाथ्यं सद्वस्तु वस्तुतः । तौ तु सम्भूय भुञ्जाते, पुंजातैः प्रीतिकृत् त्वदः ॥ २९ ॥ कुत्रचिद् दिवसेऽन्यत्र, पद्मावत्यां गृहस्पृशि । धनञ्जयेन तत्पित्रा, पुत्रीक्रीडार्थमर्थवत् ॥ ३० ॥ कपर्दाशीतिप्रमितः, पणः प्रैपि सुताकरे । तद्वयस्यमृगाङ्केन, विश्रम्भाश्रितचेतसा ॥३१॥ भोज्यं पणकपर्दाना–मानीयानीय भावतः । भुक्तमेकाकिना तेन, बाल्यलौल्यवता सता ॥ ३२ ॥ त्रिभिर्विशेषकम् ॥ पद्मावत्या–मुपेतायां, मृगाङ्केनोदितं हि सत् । तया रुषितयाऽभापि, कृतं सुष्ठु त्वया न भोः ! ॥ ३३ ॥ यदि ते मेऽन्तिके सन्तोऽभविष्यंस्तत्कपर्दकाः । तान् विक्रीय ततोऽहं त्वकारिष्यं भूषणं क्षणात् ॥ ३४ ॥ एवमेव त्वया व्यर्थ–मग्रध्युदरिणा कथम् ? ।

' नात्मीयः प्रायशः कश्चित् , कदाऽप्यौदरिकस्य हि ' ॥ ३५ ॥ कुमारस्तदुराकारो, निधाय हृदये स्थितः । 'न विस्मरति विस्मेरं, केषांचिद् दुर्वचः कदा ' ॥ ३६ ॥ अथाध्ययनपर्यन्ते, गुरुणा तावुभावपि । पित्रोः समर्पितावत्र, विद्यापात्रे इवोत्तरे ॥ ३७ ॥ श्लोक–काव्य–कथाग्रन्था–भ्यसनैर्व्यसनैर्विना । स्वसवर्ग्यजनाश्चित्यं, तावमूमुचतां मुदा ॥ ३८ ॥ क्रमेण यौवनारूढौ, प्रौढाविव धियर्धया । परस्परं परप्रेम–प्रेसाविव बभूवतुः ॥ ३९ ॥ पित्रोरपि त्रपापेतं, तदावेद्य स्वसंविदा । कृतनात्रककर्माणौ, व्यूढौ निर्व्यूढसख्यकौ ॥ ४० ॥ ततस्ताविसिसञ्जात–विख्यातस्नेह–मोहनौ । विहृतः सुष्ठुतानिष्ठौ, पुष्टप्रेमतयौकसि ॥ ४१ ॥ अन्यस्मिन् दिवसे रात्रे–रन्तिमे प्रहरे विधेः । मृगाङ्कस्य तदाप्यक्तं, स्मृतं पद्मावतीवचः ॥ ४२ ॥ " येन केनापि यत् किञ्चित् , प्रोक्तं दुर्वचनं हृदः । न विस्मरति कस्यापि, भवितव्यमिदं यतः ॥ ४३ ॥ " इतश्च दिवसे तस्मिन्, सागरचन्द्रनामकम् । स्वमित्रं तु प्रतिष्ठासुं, द्वीपे सागरवर्त्मना ॥ ४४ ॥ पूरयन्तं प्रवहणं, वार्धियोग्यक्रयाणकैः । ज्ञात्वा तदा मृगाङ्कोऽपि, ततश्चिचलिषुरत्वभूत् ॥ ४५ ॥ मुत्कलाप्य स्वपितरौ, वारयन्तावपि स्वयम् । गत्वा पद्मावतीं प्रोचे, प्रतिष्ठासुरिति प्रियाम् ॥ ४६ ॥ भद्रे ! रूपरमामुद्रे !, प्रेमसान्द्रे ! शृणुदितम् । समुद्रेऽहं तु यास्यामि, लाभवाणिज्यकर्मणे ॥ ४७ ॥ युग्मम् । त्वया कुलस्त्रिया सम्यग्–रीत्या स्थेयमनाकुलम् । ' कुलकाष्ठं स्त्रियस्ता हि, याः पतिव्रतसंवृताः ' ॥ ४८ ॥ ततः पद्मावती प्राह, विरहासहमानसा । नाहं त्वद्रहिता स्थाता, समायाता त्वया समम् ॥ ४९ ॥ दिनश्रीर्वा दिनाधीशं, रजनी रजनीश्वरम् । विधुद्धन्तं विना विद्युत् , क्वापीष्टे स्थातुमातुरा ? ॥५०॥ तथाऽहमपि विज्ञेया, प्रिय ! त्वदनुयामि(यि)नी । सुखं दुःखं कुलस्त्रीणा–मस्तु पत्या समं सदा ॥ ५१ ॥ तेनोक्तं तर्हि भवता–प्येवं चेद् रोचते हि ते । स तया सार्धं चाऽर्यन्तो, राक्षसद्वीपमाप च ॥ ५२ ॥ पद्मावत्याऽन्वितः सत्या,

महत्या तद्दिदृक्षया । कौतुकं पूरयामास, स्वदृशोर्द्वीपभूमिषु ॥ ५३ ॥ तं वासरमतिक्रम्य, रम्ये कदलिकानने । सप्रियोऽपि स सुष्वाप, रात्रावक्षयसौख्यतः ॥५४ । एवं दिनानि भूयांसि, समुपास्य सुखं मुदा । प्रियाप्रियावतिमष्ठ–सुखाश्लिष्टावतिष्ठतम् ॥५५॥ पुनः प्रवहणेष्वेवं, पूर्णभाण्डेषु तज्जनैः । [illegible] [illegible], मृगाङ्कोऽचिन्तयच्च तत् ॥५६॥ यदेतया पुरा गर्वाद् , दुर्वचोऽत्राचि वाच्यवत् । तदेतस्या अ(अ)वश्यायाः, कुर्वे दुर्वैधवद् धियः॥५७॥ ध्यात्वेति चेतसैकत्र, रात्रावेव विवेकशात् । कपर्दाशीतिप्रमितं, पणं बध्वा तदञ्चले ॥५८॥ सुप्तामेव विमुच्याशु,निभृतं सम्भृताक्षपम् (पद्मावतीं त्यक्त्वा,स प्रियोऽपि प्रियामपि) । समुत्थायावहित्थात्मा, मृगाङ्कः प्रपलायत ॥५९॥ त्रिभिर्विशेषकम् । प्राप्य पोतसमीपे स, कपटं नाटयन् पटु । पूच्चकारेति दुर्वारं, वारं वारं दुरन्तरम् ॥ ६० ॥ यद् भो भोः ! भक्षिताऽत्राशु, प्रेयसी रक्षसा मम । दृष्ट्वा नष्ट्वा पलाय्यायाहं कष्टादनिष्टतः ॥६१॥ प्रेर्यन्तां यानपात्रं तत् , त्वरितं भरितं यतः । समेष्यति न चेद् रक्षः, क्षामकुक्षि बुभुक्षया ॥ ६२ ॥ एवमुक्ते भिया मुक्तं, तेन तद्दयितेन हि । प्रेरितं तैः प्रवहणं, वायुवेगमनर्गलम् ॥ ६३ ॥ इतश्च सा जजागार, कुस्वप्नेनेव बोधिता । सम्भ्रान्तेव क्षपाप्रान्ते, प्रेयांसं न समैक्षत ॥ ६४ ॥ तदोत्थायाचिरायारं, तीरं कृत्वा सरित्पतेः । नापश्यत् पोतमुत्पश्या, पोतवच्चेतसः प्रियम् ॥ ६५ ॥ इतस्ततस्तदालोक्य, सर्वशून्यमिवाथ सा । शोकास्तोकतया तप्ता–ऽपसद् भुवि मुमूर्च्छ च ॥ ६६ ॥ प्रातः शीतेन वातेन, विनीतेनेव बन्धुना । क्षणं लम्भितचैतन्या, रोदःक्षोदं रुरोद सा ॥ ६७ ॥ द्वीपवच्छून्यवेश्मान्त–र्मालतीव वनान्तरे । व्यर्थं सा विललापोच्चै–र्न केनापि निवारिता ॥ ६८ ॥ स्वयं वस्त्राञ्चलेनास्र–मपनेतुमना मनाक् । कपर्दकपणं बद्धं, ददर्श विममर्श च ॥ ६९ ॥ तद् बाल्योक्तं स्मृतवती, चित्ते चिन्तितवत्यपि । ' अहो ! वज्रादपि प्रायः, पुरुषाः परुषा रुषा ॥ ७० ॥ अथ प्रासस्वरूपा सा, व्यावृत्य

द्वीपमाप्तत् । तपस्विनीव सा तस्थौ, गिरिकन्दरमन्दिरम् ॥ ७१ ॥ तत्र चित्तविनोदाया–पनोदायापदंहसम् । श्रीयुगादिजिनस्याधाद् , बिम्बं लेप्यमयं सुधीः ॥ ७२ ॥ परमेष्ठिनमस्कार–पुरस्कारमनारतम् । विधिज्ञा विधिवत् पुष्प–फलैः सा देवमार्चयत् ॥ ७३ ॥ ववन्दे च चिदानन्दान्, देवान् शक्रस्तवादिभिः । ' प्रायः स्त्रीणां सतीश्रीणां, भावपूजा मतोचिता ' ॥ ७४ ॥ पूर्वाधीतं च साऽध्येति, शुभवद् बन्धुरादरा । सामायिकव्रतावश्य–कादि सादितपातका ॥ ७५ ॥ कन्दमूलफलैः प्राण–वृत्तिं च प्रासुकैरधात् । सा कालं सफलं सेने, धन्यम्मन्या दिने दिने ॥ ७६ ॥ समानवमिमं द्वीप–मिति ज्ञापनहेतवे । ध्वजं वंशाग्रगं बध्वा, वृक्षाग्रे धृतवत्यपि ॥ ७७ ॥ अत्रान्तरे कियत्स्वेवं, दिवसेषु व्रजत्स्वथ । पत्रसांयात्रिकस्तत्र, द्वीपमापद्यम्पतेः ॥ ७८ ॥ ध्वजं दृष्ट्वा पदस्पष्टं, पोतादुत्तीर्य सत्वरम् । पदपद्धत्यनुपदी, प्रापद् गिरिगुहान्तरम् ॥ ७९ ॥ तत्राधिष्ठातृदेवीव, देवार्चाकर्मकर्मठा । ददृशे सुदृशो दृश्या, विस्मितेन हि तेन सा ॥ ८० ॥ तां स्वसारमिति प्रोच्य, व्याजहार गिराऽऽदरात् । साऽपि तद्वचसा भृत–विश्रम्भा तमभाषत ॥ ८१ ॥ हे भ्रातर्यदि सत्योऽसि, भ्राता तन्मामतः पराम् । वसतिं नय पोतेन, चिरं जीव वराशिषा ॥ ८२ ॥ तेन पोते समानायि, प्रेरि पोतस्ततः परम् । स तां रूपोद्धुरां दृष्ट्वा, चलचित्तोऽब्रवीदिति ॥ ८३ ॥ यदि भद्रे ! मदीयेन, जीवितेन प्रसीदसि । तर्हि मां भज भोगार्थं, त्वं स्मरज्वरजर्जरम् ॥ ८४ ॥ यतः–" तावन्महत्त्वं पाण्डित्यं, कुलीनत्वं विवेकिता । यावज्ज्वलति नाङ्गेषु, हन्त ! पञ्चेषु–पावकः ॥ ८५ ॥ " " मध्यत्रिवलीत्रिपथे, पीवरकुच–चत्वरे च चपलदृशाम् । छलयति मदन–पिशाचः, पुरुषं हि मनागपि स्खलितम् ॥ ८६ ॥ " " तावदेव कृतिनामपि स्फुर–त्येष निर्मलविवेक–दीपकः । यावदेव न कुरङ्ग–चक्षुषां, वीज्यते चटुललोचनाञ्चलैः ॥ ८७ ॥ " इत्यादि । ततः सा वर्णिनी कर्णौ, पिधाय विधुरा पुरा । शान्तं पापमिति प्रोच्य,

प्राह सौहसर्स(सिं)हिका ॥ ८८ ॥ आः ! पापव्यापसंलापाद्, मगिनीं प्रतिपद्य माम् । मद्य-मांसादिव वक्षि, विलक्षमसमञ्जसम् ? ॥ ८९ ॥ " सन्तस्त एव सन्तस्तु, शीललीलाकुलाः कुलात् । ये प्रतिपन्ननिर्वाह-साहसाङ्कसहाः सहाः ॥ ९० ॥ " " ये खलाः सुखला लोलाः, कोलायितकुलाकुलाः । ते पुनः स्वश्वश्रुलया-हत्यात्याहत्यसंहताः ॥ ९१ ॥ एवं सत्यां तदा पद्मा-वत्यामत्यन्तनीमिता ! श्रुवाणायां गुणागण्यं, यज्जातं तद् वितन्यते ॥ ९२ ॥ अत्रान्तरे वरेण्याभिः, पोतदेवीभिरोच्यत । रे दुरात्मन् ! शिरःशूलं, पोतारूढः करोषि किम् ? ॥ ९३ ॥ कुकर्म धर्मनिर्मुक्तं, शर्मभित् कुरुषे रुषे ! । ततो भवतु ते पोत-स्फोटः संस्फोटकः श्रियाम् ॥ ९४ ॥ ततः सम्पात-दुर्वात-महोत्पात-निपाततः । भग्ने पोते तु सा लेभे, फलकं पुलकाञ्चिता ॥ ९५ ॥ तद् भुजाभ्यामथादाय, समुदायं मुदामिव । तरीतुमब्धिमारब्ध, लब्धोधमवती सती ॥ ९६ ॥ तत्राप्यत्रान्तरे दैवा-ज्जवाज्जलकरेणुना । करेणोच्छालिता सोच्चैः, कन्दुकोच्छाललीलया ॥ ९७ ॥ अपतन्त्येव साऽऽकाशाद्, दध्रे विद्याभृता यता । ' प्रायः प्राणभृतां स्याता, दैवाद् द्वे सम्पदापदे ' ॥ ९८ ॥ विद्याधरोऽपि तां रूप-निरूपीकृतदेवताम् । निरूप्य प्रार्थयाञ्चक्रे, कामार्थं चाटुपाटवम् ॥ ९९ ॥ रूपमर्धश्रिया मिश्रं, प्राप्तरूपे न्यरूप्यत । क्वापि स्वादश्रियामत्र-मेतच्छीता निदर्शनम् ॥ १०० ॥ सा तं विद्याधरं भ्राता, त्वं मेऽसीति वशीन्द्रिया । अत्यबोधि धियः शुद्ध्या, सुबोधो बोधनात् बुधः ॥ १०१ ॥ तदा विद्याधरेणापि, परितुष्टेन शिष्टवत् । अदृश्यकारिका वैरि-विद्योच्छेदकरी यथा ॥ १०२ ॥ विद्या रूपपरावृत्ते-रेतत् तस्यायदीयत । वितेने तेन सा चेति, विद्याशक्तित्रयीमयी ॥ १०३ ॥ इत्थं सत्कृत्य तां भक्त्या, भ्रातृवद् भगिनीमिव । सं(सुं)सुमारपुरोद्याने, स सद्यस्तामममुचत ॥ १०४ ॥ " सज्जनः सुजनः पुण्यः, पण्डितः शीलमण्डितः । यत्र यत्र व्रजत्येवं, तत्र तत्र स पूज्यते ॥ १०५ ॥ " साऽपि

पद्मावती रूप-परावर्तनविधया । पुंरूपं प्राप्य पूर्मध्ये, जगामोद्दामधामधीः ॥ १०६ ॥ स प्राह साहसाङ्कोऽह-मिति पृच्छति पूर्जने । ' प्रायः साहसिकाः स्वार्थ-सिद्धये स्युरलक्षिताः ' ॥ १०७ ॥ तत्रैकस्यास्तु वृद्धायाः, प्रगेऽयं गेहमागतः । माता मे त्व-मिति प्रोच्य, तस्थावास्थाऽतिसुस्थितः ॥१०८॥ सकलं सकलाभिः स, कलाभिः कलितः कलः । कलावानिव तत्कालं, कलया-मास सत्कुलम् ॥ १०९ ॥ ज्ञान-विज्ञाननिध्यानात्, पौरगौरवगौरवीः । धर्मिष्ठानप्यधर्मिष्ठां-स्तोषयामास भामनः ॥ ११० ॥ यतः—" लवणात्र रसोऽस्त्यन्यो, न विज्ञानात् परः सुहृत् । धर्मादन्यो निधिर्नेद्धः, क्रोधादन्यो न वैरवान् ॥ १११ ॥ " एकर्हि कौतुकाद्वैतात्, क्रीत्वाऽर्धपणदानतः । बर्हिबर्हान् प्रबर्हांश्चानाय्य प्राज्याङ्कवर्णकान् ॥ ११२ ॥ पट्टसूत्रेण संसूत्र्य, व्यञ्ज(ज)नं जनरञ्जनम् । नरवर्मनृपमङ्के, नामाङ्कमचीकरत् ॥ ११३ ॥ तज्जरत्याः करे प्रार्प्य, पुरान्तः प्राहिणोत् स हि । षोडशोत्तरसत्पञ्च-शतीं द्रम्मान् ददाति यः ॥ ११४ ॥ तस्मै देयमदस्ताल-वृन्तमित्यनुशिष्य च । ' विज्ञानेन विना न स्यात्, प्रसिद्धिस्तद्वता सताम् ' ॥११५॥ युग्मम् । तद् रम्यमपि तद्द्रम्म-बाहुल्य(बहु)मूल्यतया तया । न लोकः कोऽपि गृह्णाति,'द्रम्माः खलु सुदुस्त्यजाः' ॥ ११६ ॥ येन केनापि लोकेन, द्रव्याणुस्पृहयालुना । ग्रहीतु शक्यतेऽशक्यं, तादृशं वस्तु वस्तुतः ? ॥ ११७ ॥ राजा व्यजन-वार्तां तां, श्रुत्वा स्वान्तिकमानयत् । नेत्रमित्रं तु तद् दृष्ट्वा, स्वकनामाङ्कमेक्षत ॥ ११८ ॥ तदुक्ताद् द्विगुणं मूल्यं, दत्त्वा सत्त्वा-धिकत्वतः । पप्रच्छातुच्छयच्छं, कोऽस्य कर्तेति तां प्रति ॥ ११९ ॥ मत्पुत्रः साऽऽह राजेन्द्र !, साहसाङ्कसमाह्वयः । तमह्नाय समाहूय, भूपः पप्रच्छ वत्सलः ॥ १२० ॥ भो वत्स ! वेत्सि विज्ञान-मन्यच्चापि मनःप्रियम् ? । तेनोक्तं युक्तिमत् सर्वं, वेद्मि निच्छद्मसद्म सत् ॥ १२१ ॥ राज्ञाऽथाचल-विजया-दिकाः पुत्राः स्वकास्ततः । तस्मै दत्तास्तदा तेन, कलासु कुशलाः कृताः

॥ १२२ ॥ राज्ञे समर्पितास्तेन,ते सर्वेऽप्यस्तत्सत्कलाः । ' कुशाग्रीयधियां यस्माद्, बुद्धेरसुकरं किमु ? ' ॥ १२३ ॥ राज्ञा तुष्टेन
स प्रोचे, किं तुभ्यं दीयते वद ? । सर्वदानाधिकं येन, विद्यादानं त्वया ददे ॥ १२४ ॥ साहसाङ्को नृपं प्राह, तदा स्वाभिमतं
हृदि । शुल्कमण्डपिका-मुद्रा, मह्यमर्प्या महीपते ! ॥ १२५ ॥ राज्ञा तथैव तच्चक्रे, चक्रेतरहृदा मुदा । लोकानां तेन दानार्द्धं,
त्यक्तं युक्तिमता सता ॥ १२६ ॥ ऊचे चेति परं दान-चौरि कार्या न सर्वथा । यः करिष्यति मर्त्यस्त्वं, हर्ताऽहं तस्य निश्चितम्
॥ १२७ ॥ पुम(न)र्यथेप्सितं दण्डं, करिष्ये तस्य तत्क्षणम् । इति रीतिकृते बन्धे, निर्बन्धेन स निर्वहेत् ॥ १२८ ॥ अत्रान्तरे परं
चौरो-पद्रुतैस्तत्पुरीजनैः । राज्ञो विज्ञसमाश्वेत्य, सर्वं चौरविचेष्टितम् ॥ १२९ ॥ राज्ञाऽऽहूतस्तलारक्षो, रक्षितुं लोकमक्षतम् । प्रोचे
च रे तलारक्ष !, चौरं द्रक्ष्यति नो कथम् ? ॥ १३० ॥ स प्राह हे महाराज !, पश्यन्नपि दिवानिशम् । न चौरं क्वापि पश्यामि,
मूढवद् ब्रह्म तत्परम् ॥ १३१ ॥ स्वयमेव ततो राजा, चौरनिग्रहहेतवे । प्रच्छन्नं निर्गतोऽभ्राम्यत्, पुरे वायुरिवान्तरः ॥ १३२ ॥
राज्ञाऽप्यज्ञायि नान्यायी, अपक्रमवशादसौ । अदृष्ट्वा चौरमागार-मागाद्राज्ञमवदेश(ष?)यम् ॥ १३३ ॥ इतश्च मन्त्री सन्मन्त्रः, समा-
गत्य प्रणम्य च । व्यजिज्ञपन्नृपं देव !, मा विषीदेति तं वदन् । १३४ ॥ दिनपञ्चकमध्ये तं, ग्रहीष्यामीह चौरटम् । विडम्बनाहं
मद्बुद्धे-र्नास्त्यसाध्यं प्रसिद्धितः ॥ १३५ ॥ स चौरस्तु महाशूरः, प्रतिज्ञां मन्त्रिणोऽशृणोत् । रात्रौ मन्त्रिगृहे गत्वा, दत्त्वाऽवस्वा-
पिनीं पुनः ॥ १३६ ॥ विशेषामर्षवांस्तस्य, सर्वस्वं मन्त्रिणोऽग्रहीत् । ' दस्यवो दुर्धराः स्युर्वै-र्नृणां विद्याबलोल्बणाः ॥ १३७ ॥
युग्मम् । एवमन्ये बुधम्मन्या-स्तापसाद्यास्तदुद्य(द्य)ताः । सर्वे विडम्बितास्तेन, मन्मथेनेव सर्वथा ॥ १३८ ॥ अत्रान्तरे तु मकर-
दंष्ट्राऽऽह्वा शु(श)म्भली सभाम् । समेत्य भूपतिं नत्वा-ऽवादीदिति ससङ्गरम् ॥१३९॥ देवाहं महदुत्साहा, ग्रहीष्ये चौरमारवत् ।

'स्त्रीचरित्रं यतश्चित्रं, सपत्राकुरुते जगत् ' ॥१४०॥ चौरोऽपि शु(श)म्भलीसन्धां, श्रुत्वा सत्त्वाधिको धिया। मारूपः सशृङ्गारो, रात्रौ तद्गेहमार सः ॥१४१॥ तद्गृहद्वारि सध्यारि-मुच्चं प्राप्य स चेटिकाम् । प्रहृत्य मुष्ट्या सरली-चक्रे रूपामरीमिव ॥१४२॥ तया विस्मितया त्वेत्य, विज्ञप्ता शु(श)म्भली शुभे ! । स्वामिनि ! द्वारि चेदक्षो, दक्षः कोऽप्यस्ति शस्तना ॥१४३॥ येनाहं सरली-चक्रे, हत्वा सुष्ठु स्वमुष्टिना । चमच्चक्रे ततो वेश्या,वश्यालस्या कुकर्मसु ॥१४४॥ शु(श)म्भल्या स तदाऽऽहूतः, पुरुहूत इवादरात् । जगाद तामहं सर्व-कलासु कुशलोऽस्म्यम्बम् ॥ १४५ ॥ ततः साऽऽह नता स्वच्छ !, वत्स ! मां तरुणीं कुरु । पुनर्येन जनं सर्वं, वशयामि दिवानिशम् ॥ १४६ ॥ ततः स औषधं दत्त्वा-ऽवादीदेवमतः परम् । त्वयाऽपवरकस्यान्तः, प्रविश्य स्थेयमास्यया ॥१४७॥ सम्यग् नियम्य तद्द्वारं, भक्ष्यमौषधमिक्षुवत् । प्रभातश्च तरुणी, भविष्यसि सुरी वरा ॥ १४८ ॥ तद्गृहात् सर्वमादाय, गतोऽ-न्यत्र क्वचिच्च सः । कु(य)तो मुहूर्त्तसो धूर्त-र्धूर्त्यैवे ह्यखिलं किल ! ' ॥ १४९ ॥ ततश्च प्रातरायाता, शुभाशा शु(श)म्भलीसुता । खरं खरीस्वरं श्रुत्वा, हत्वा चात्मानमात्मना ॥ १५० ॥ रुदद् विघाट्य तद्द्वार-मक्षामैक्षिष्ट रासभीम् । काकूयमानामधिकं, कर्ण-स्फोटस्फुटं कटु ॥ १५१॥ युग्मम् ॥ विखिन्नमानसा दीना, तस्यावस्थानदुःस्थिता । धूर्तघ्र(धृ)ष्टस्तु कस्याग्रे, समाचष्टेऽन्यमुष्टस्तु ? ॥ १५२ ॥ यतः-" द्यूतारः स्थविरो घ्र(धृ)ष्ट-वञ्चकु(ठक्कु)रः स्थानभ्रू(भ्र)ष्टकः । रणनष्टोऽकथा घ्र(धृ)ष्टो, मुष्टोऽष्टौ स्युरथोदशः ॥ १५३ ॥ " तदा परिच्छदैश्छन्न-मस्या यद् रोरुदीत्यदः । ' चौरमाता मुखं कोष्ठ्यां, न्यस्य रोदित्यतश्शठः ' ॥१५४॥ पुन-र्दिने तु कस्मिंश्चि-न्नृपपुत्रीमपि द्रुतम् । जह्रे हिरण्यरेखाऽऽख्यां, सुबुद्धि दुष्टकर्मवत् ॥१५५॥ ततश्चानन्तरं राजा-ऽदीदपत् पटहं पुरे । एतदुद्घोष्य सद्घोषं, सर्वलोकमभि स्फुटम् ॥ १५६ ॥ यो मत्पुत्रीमिमामिष्टा-मानयेच्छलतद्बलात् । तस्मायस्मि ददाम्येतां

यथेप्सितधनं ततः ॥ १५७ ॥ भ्राम्यतीति पुरेपारं, पटहे पटहेतवे । न कोऽपि रोपितप्रीति, पटहं तमपस्पृशत् ॥ १५८ ॥ साहसी साहसाङ्कोऽस्तो, श्रीपथे सञ्चरन्नथ । प्रास्प्राक्षीत् पटहं दाक्ष्या(क्ष्या)ढ्, वीक्षाऽऽपन्नजनेक्षितम् ॥१५९॥ यतः—"अर्थपाठश्च कुष्ठश्च, दक्षो दुष्टोऽपि निष्ठवत् । रहन्ति छन्नं न क्वापि स्वब्दाच्छन्नोदिताकंवत् ॥ १६० ॥" सतां प्रीतिमेत(मेति)श्चाप्य—भोगेऽपि शुभगा शुभा । 'निधानस्थाऽपि किं न श्रीः, सुस्थिरं कुरुते मनः ?' ॥ १६१ ॥ ततो राजसमीपे स, गत्वा नत्वाऽवदन्नृपम् । विषण्णो भव मा भूप !, स्वरूपं भज भूपते ! ॥ १६२ ॥ तव पुत्रीमहं मित्री—भूतस्त्वत्पुण्यश्रुतितः । समानयामि श्रीराम—सन्निवज्ञनकात्मजाम् ॥ १६३ ॥ इत्युक्त्वा स गृहं गत्वा—ऽनुचरानाह साहसात् । भाण्डागारगुरुद्वार—मुद्घाटं रक्ष्यमद्य तत् ॥१६४॥ निभृतं स्थेयमप्रेय—श्चौरमाशङ्क्य सङ्कुलम् । न प्रकार्यमितस्स्थैर्यं, शिक्षयामास चेति तान् ॥ १६५ ॥ युग्मम् । स्वयं सस्मार तां विद्या—मदृशीकरणक्षमाम् । परविद्याच्छिदं विद्यां, दध्यात्रध्यात्मिवत् स च ॥ १६६ ॥ स चौरस्तत्प्रतिज्ञां तां, श्रुत्वा गत्वा च तं प्रति । तालोद्घाटकरीं विद्या—मपस्वापनिकां स्मरन् ॥ १६७ ॥ तस्य वेश्म विवेशाशु, वस्तु जग्राह चाहितः । निर्जगाम धियोद्दामा, धाम स्वं यातुमुद्यतः ॥ १६८ ॥ कुमारस्तु धियोद्धारो, लग्नस्तत्पृष्ठ एव सः । खङ्गभाग् निर्ययौ पुर्या—स्तत्पातालगृहं गतः ॥ १६९ ॥ चौरो धनं धनस्थानं, नीत्वा मुक्त्वा च यत्नतः । राजपुत्रीसमीपेऽगात्, तां च प्रोवाच चञ्चलः ॥ १७० ॥ सुन्दरि ! त्वरितीभूय, भूयो मत्कथितं कुरु । प्रमदा(अबला)सु बलात्कारः, क्वापि न क्रियते यतः' ॥१७१॥ कृत्वेति हेतुना नाहं, बलात्कारं करोम्यरम् । कामशास्त्रे यतः प्रोक्तं, 'स्त्रीषु मार्दवमाचरेत्' ॥ १७२ ॥ भृतमन्युस्ततः कन्या, प्राह साहसवन्मनाः ।

नाहं करोमि रे पाप !, त्वद्वचः पापपाकिमम् ॥ १७३॥ परमद्याधुना सद्यः, पापं ते पाकमागतम् । पतिष्यति शिरस्येव, रे वराक ! स कालवः ॥ १७४ ॥ ब्रुवाणामिति तां कन्या-मन्यायी स स्वमन्युतः । करे धृत्वा तु समाह, स्मरेष्टं सुष्ठु निष्ठुरे ! ॥१७५॥ अत्रान्तरे चरेण्योराः, कुमारः सारविक्रमः । भ्रुकटीमुग्र प्रोवाच, तं चौरमचिरादिति ॥ १७६ ॥ रे ! दुरात्मन्नरं क्रूर !, कन्यां हंसि नृशंस हे ! । कथं सिध्यति ते खड्ग-स्त्रुट्यत्कण्ठस्य कुत्सितः ? ॥१७७॥ तन्मुक्तः कुमरे खड्गः, कापि चास्फल्य यल्यपि। काष्ठखण्ड इव लग्नो, भग्नो भूमोऽम्बुमग्नवत् ॥१७८॥ ततो मुद्गरमुद्यम्य, तं धावन्तं क्रुधोद्धुरम् । कुमारः पादघातेन, पातयामास लासतः ॥१७९॥ निहत्य मुष्टिभिः सुष्ठु, तं कात्स्न्यात् पदपार्ष्णिभिः। मयूरबन्धात् सोऽबध्नात्, त्रुट्यत्सन्धि त्रटत्स्नसम् ॥१८०॥ युग्मम् । कुमारीं च तथाऽऽश्वास्य, विश्वास्य च वरादरम् । पिधाय च गृहद्वारं, निरगादात्तकन्यकः ॥ १८१ ॥ प्रातः सदसि गत्वा च, स नत्वा प्राह भूविभुम् । राजन् ! पुत्रीं गृहाणेमां, क्षेमवांश्च भवामितः ॥ १८२ ॥ पुण्यश्लोकाश्च ते लोका, विलोक्या-लोक्यलोकनैः । स्वं स्वं वस्तु च गृह्णन्त्व-निह्नवाच्च व्यजिज्ञपत् ॥१८३॥ युग्मम् । राजा चमत्कृतश्चान्तः, श्रा(स्वा)न्ते भ्रान्तोऽभवच्च यः । तत् तथा कारयामास, समासेन समादिशन् ॥ १८४ ॥ चौरमानाय्य चामा(न्या)य्य-निवृत्त्यै न्यायवान् नृपः । सकृपः कल्पयामास, सुरूपां कुट्टिनीं च ताम् ॥ १८५ ॥ तस्मात् पुनरपस्वाप-तालोद्घाटकरीं द्वयीम् । विद्यामादाय विषयात्, स तं च निरवा-सयत् ॥ १८६ ॥ एवं विद्यावते तस्मै, साहसाङ्काय रंहसा । राज्ञा हिरण्यरेखा सा-ऽदायि पूर्वमुदीरिता ॥ १८७ ॥ अत्रान्तरे परद्वीपात्, सिंहलाद् दैवयोगतः । वस्तून्युपार्ज्य तत्रागा-न्मृगाङ्कः पोतसार्थपः ॥ १८८ ॥ गृहीत्वोपायनं सोऽपि, साहसाङ्कमुपाययौ । दृष्ट्वा साहसाङ्केनो-पालक्षि च तदेक्षणात् ॥ १८९ ॥ त्यक्त्वा शुल्कार्थमूचे स, कार्यं चौर्यं न शुल्कगम् । विलोकितुं च

तत्पोत–मारुपात स्वयं स्यात् ॥ १९० ॥ विदन् नन्दगतिं मन्त्या, दानचौर्यादि विद्यया । गत्वा पोतान् व्यलोकिष्ट, शिष्टदौषिकवत् स्वयम् ॥ १९१ ॥ तदुक्तादधिकं वस्तु, विलोक्य क्रोधदुर्धरः । स तमाह महादुष्टं, प्रागपि ज्ञातवृत्ततः ॥ १९२ ॥ रे ! त्वया सातिरेकेऽपि, दानार्धेऽपि कृते सति । किं दानचौरिकाऽकारि, न्यत्कृतव्यवहारिता ? ॥१९३॥ स तस्योऽङ्घ्रिप्रहारेण, हारेणेव क्षुधः क्षिपः । निजघ्ने गतविघ्नेन, साहसाङ्केन मस्तके ॥१९४॥ तत्सर्वस्वं गृहीत्वा तं, संगृह्य च महाग्रहम् । निन्ये स्ववेश्म निगडै–र्निगड्य निहितो रहः ॥ १९५ ॥ प्रत्यहं क्रियते तस्य, कम्बाभिस्ताडनं पुनः । पानं पर्युषितं चोष्णं, वारिपानमवारितम् ॥ १९६ ॥ दुःखमेवं विषहते, मृगाङ्को मृगवद् [illegible] । [illegible] मन्दुरा कृतः ॥१९७॥ स सेवां साहसाङ्कस्य, कुर्वंस्तिष्ठति शिष्यवत् । साशङ्कं साहसाङ्कं स, पश्यन् वक्तुमपारयन् ॥१९८॥ चिन्ताविधुरितस्वान्त–श्चिन्तयत्येवमेव सः । पद्मावती किमेषा न, परावर्तितरूपभृत् ? ॥ १९९ ॥ पुनः स्वचित्तं तद्भ्रान्तिं, निवारयति सान्तरम् । 'यच्चित्तं नयने चैते, जातिस्मृतिवती स्मृते' ॥ २०० ॥ गतेऽत्र चिरकालेऽथ, विचा(का)ले प्रासवत्यपि । साहसाङ्कं स चाह स्म, विस्मयापन्नमानसः ॥ २०१ ॥ स्वामिन् ! प्रसद्य मां मुञ्च, बन्धूनां मिलनाय यत् । गच्छाम्यहं महासत्त्व !, सत्वरं हि त्वदाज्ञया ॥ २०२ ॥ प्राहाथ साहसाङ्कस्तं, न त्वां मुञ्चामि वञ्चकम् । सापराधमिव व्याघ्रं, गुणभाग्योपसर्गदम् ॥२०३॥ स पुनः प्राह पुण्याह !, स्वामिन् ! केनापि हेतुना । प्रकारेण च मां मुञ्च–स्वासिस्पर्शमिवादिश ॥ २०४ ॥ तेनोक्तं युक्तितो मत्क–पादयोः पलमात्रकम् । यद्याज्यं शोषस्येषणु(?), मुञ्चामि त्वां तदाऽऽपदः ॥ २०५ ॥ तेन प्रोक्तं तथैवेति, पारवश्यवशा सता । 'यतो नरकसङ्काशं, परायत्तत्वमुत्तरम्' ॥ २०६ ॥ ततः पलप्रमाणाज्यं, कृत्वा कच्चोलकेऽचलत् । साहसाङ्कः समं तेना–स्वाप्सीच्च सदनोपरि ॥ २०७ ॥ मृगाङ्कः सोऽपि

सुप्तस्य, साहसाङ्कस्य पश्यगः । स्नेहेन प्रक्षयत्यंह्री, ह्रीमान् संवाहनावहः ॥ २०८ ॥ साहसाङ्कस्य पादान्ते, दान्तेच्छं तस्य पश्यतः । न क्षीयते घृतं न्यस्तं, दुःखितस्य यथा दिनम् ॥ २०९ ॥ कुमारः साहसाङ्कस्तु, सुप्तः कपटनिद्रया । विलोकयति कर्तव्यं, किमतः परमित्यतः ॥ २१० ॥ स कचोलकमुत्पाट्य, मृगाङ्को रङ्कचेष्टया । पयःपिपासुवत् त्वाज्यं, पपौ प्रौढोऽपि मूढवत् ॥ २११ ॥ कुमारेण ततः प्रोचे, सोऽचेतन इवोचितम् । रे पाप ! किं पपे पाद-संवाहनघृतं श्रुतम् ॥ २१२ ॥ इत्युक्त्वा जघया हत्वा, स बभाषे विभाषया । तव किं क्रियते ब्रूहि, किङ्करस्येव दैवतः ! ॥ २१३ ॥ दोषाङ्केन मृगाङ्केन, दिने विच्छायतो यथा । विक्षत्वमिति सङ्क्लिष्टं, साहसाङ्कस्य भास्वतः ॥ २१४ ॥ त्वत्करा भास्वराः स्वैरं, तमस्काण्डनिराकृतः । मत्पृष्टिश्च तमःस्पृष्टी, रोचते तत् कुरूत्तरम् ॥ ॥ २१५ ॥ ततस्तेन प्रशस्तेन, कृपापरवशात्मना । कृत्वा स्वं रमणीरूपं, विश्वरूपप्रियोपमम् ॥ २१६ ॥ भुजे सौख्यभुजे धृत्वा, पर्यङ्के स न्यवेश्यत । प्राञ्जला प्राञ्जलिः पश्चात्, व्यजिज्ञपदिदं हि सा ॥ २१७ ॥ युग्मम् । स्वामिन् ! त्वदभिमानेन, विमानेन, विपद्रुचां(द् ध्रुवम्) । विरूपं तेऽकृताकृत्यं, तत् क्षन्तव्यं क्षमानिधे ! ॥ २१८ ॥ मुदितेनाथ तेनोक्तं, युक्तियुग् वचनं शुचि । हे भद्रे ! शीलसद्भद्रे !, धन्योऽहं पुण्यवानहम् ॥ २१९ ॥ यस्य धर्मधयस्येयं, वर्या भार्या भवादृशी । दृश्यते शीललीलाली, जाता ख्याता प्रभावभूः ॥ २२० ॥ युग्मम् ॥ राजाऽपि ज्ञापितोदात्त-तत्कव्यतिकरोल्कहृत् । श्रुत्वा समागतस्तत्र, चित्रवान् प्रोचिवानिति ॥ २२१ ॥ अहो ! सत्त्वमहो ! सत्य-महो ! तत्त्वमहो ! मतिः । विद्यते विद्ययाऽद्यापि, पुं-स्त्री-रत्नधरा धरा ॥ २२२ ॥ नृपेणाथ पृथुन्याय-वशाऽवेत्य यथातथम् । मृगाङ्केन तदात्तेन, व्यवाहत कुमार्यपि ॥ २२३ ॥ स्या-

पयित्वा कियत्कालं, बहुमानसगौरवम् । ससुखं प्रेषयामास, राजा तं तत्पुरं प्रति ॥२२४॥ तत्र पित्रोर्मुदा पादावभिवन्द्याभिनन्दितः । सकलत्रः श्रिया सत्रा, सुखात् तिष्ठति शिष्टतः ॥ २२५ ॥ अन्यदा बहिरुद्याने, मुनीन्दुर्मतिसागरः । समायासीदयोल्लासी, विलासी श्रुतसम्पदाम् ॥ २२६ ॥ तं श्रुत्वा श्रुतिपीयूष–पुषं श्रद्धाधिया सुखम् । नृपाद्या वन्दितुं जग्मु–र्मृगाङ्कोऽपि प्रियाऽनुगः ॥ २२७ ॥ गुरुं नत्वा पुरः स्थित्वा, पीत्वा धर्मरसायनम् । लब्ध्वाऽवसरसंरम्भं, मृगाङ्कः पृष्टवानिति ॥ २२८ ॥ भदन्त ! ब्रूहि सन्देहा–पोहदं मोहरोहहृत् । मया पूर्वभवेऽकारि, दुष्कृतं सुकृतं किमु ? ॥ २२९ ॥ येन लक्ष्मीरलक्ष्मीश्च, जाता सापायता यता । तत् सर्वमुर्वपि प्राच्यं, कर्मावेदय मे दयिन् ! ॥ २३० ॥ तद्विज्ञप्तिमिमां श्रुत्वा, तत्त्वाधिकशिरोमणिः । मुनिः प्राह महोत्साह !, शृणु पूर्वभवं तव ॥ २३१ ॥ त्वया पूर्वभवे दानं, दत्त्वा भावस्तु खण्डितः । खण्डितं तेन ते सौख्यं, अत्रेऽभाग्यविडम्बनम् ॥ २३२ ॥ दानाद्याः सफला धर्माः, शर्मणेक्ताः (ते) परस्परम् । सम्पद्यन्ते प्रपद्यस्व, पञ्चाङ्गुलिनिभालनात् ॥२३३॥ " दानाद्याः संगताः सन्तः, सन्तु स्वार्थसमर्थकाः । पृथक् पृथग् न ते प्रायः, पञ्चाङ्गुलिनिदर्शनम् " ॥ २३४ ॥

तद्यथा—" सचेतनाचेतनेषु, समुदायो जयप्रदः । अचेतनेषु हस्तस्य, पञ्चाङ्गुल्या निदर्शनम् ॥ २३५ ॥ " एकदा तर्जनी दध्यौ, यदहं गुणभाजनम् । तदन्या निकटस्थाने, किं कुर्वीरन् गुणोज्झिताः ? ॥ २३६ ॥ विश्वे सङ्केतितं वस्तु, यदास्ते दर्शयामि तत् । गुणिनो वर्णयामीति, तर्जयामि सदूषणान् ॥ २३७ ॥ गुणत्रये विचारेण, गर्विता मध्यमा जगौ । रे! रे! ऽपसर दूरं(रे) त्वं, न व्याख्याहि निजान् गुणान् ॥ २३८ ॥ तयोक्तं चेद् गुणैरर्थे–स्तन्मत्तः काऽस्ति पण्डिता ? । गीततालानदं येषि, कार्योत्सुक्ये तु शुद्धिदा ॥ २३९ ॥ ताभ्यां तृतीया स्वगुणान्, पृष्टा प्रत्युत्तरं ददौ । देवपूजादि माङ्गल्यं, मदधीनं च चन्दनैः ॥ २४० ॥ ततः

कनिष्ठिका स्वीयं, शौर्यं दक्षत्वमालपद् । देहकष्टे सहे च्चेदं, वर्तेऽङ्गुगु(ग)णने धुरि ॥ २४१ ॥ सख्यश्चतस्रोऽपि वयं, प्रत्येकं गुण-भूषिकाः । अङ्गुष्ठः किं च तनुते, निकटस्थोऽतिमन्थरः ? ॥२४२॥ रे ! रेऽहं भवतां भर्ता, त्रि(ब)भाषे स क्रुधाऽरुणः। मत्सामीप्याद् विना यूयं, कुरुध्वं कवलादिकम् ॥ २४३ ॥ एवमालोच्य निर्वाच्य-मङ्गुल्योऽङ्गुष्ठकोऽपि च। स्वस्मिन् स्वस्मिन् गुणं वीक्ष्य, समत्राशत्र चैक्य(क)तः ॥२४४॥ लुलित्वाऽलि(लं) मिलित्वा च, सङ्गतेन परस्परम्। स्वसार्थं प्रार्थयामासुः, समुदायोजयस्त्विति ॥२४५॥ एवमाहृत्य दृष्टान्तं स्पष्टान्तं निजदेहजम् । चातुर्यधुर्यधीर्धर्म-चातुर्यमभितश्चरेत् ॥ २४६ ॥

निशाम्य स्वमवं पूर्वं, मृगाङ्क ! त्वमथो शृणु । यतस्ते यतते शुद्ध-धर्मधीरत्यधीश्वरी ॥ २४७ ॥ अस्मिन्नेवाभवत् क्षेत्रे धन्यग्रामे पुरे वरे । दरिद्रमुद्रानिर्निद्रः, क्षत्रियो हंसपालकः ॥ २४८ ॥ तस्य भार्या गुणैरार्या, नाम्ना लीलावतीति च । सकलत्रः स दुःस्थोऽपि, गृहस्थत्वाय कल्पते ॥ २४९ ॥ अन्यदाऽऽपृच्छ्य वात्सल्यात्, प्रियवाचा निजप्रियाम् । धनार्जनाय सोऽचालीद् दूरदेशान्तरं प्रति ॥ २५० ॥ सकलं भूतलं भ्रान्त्वा, सोऽलब्ध्वाऽर्थमपि क्वचित् । पुनर्निर्विण्णचेतस्त्वाद्, ववले स्वगृहं प्रति ॥ २५१ ॥ मार्गमध्यमथागच्छन्नन्यदा क्वापि कानने । बिल्ववृक्षे प्ररोहं स, ददर्श विममर्श च ॥ २५२ ॥ यदौषधस्य कल्पेऽस्ति, ' ध्रु(ध्रु)वं बिल्व-पलाशयोः । प्ररोहरोहणादास्ते, तदधो धनम् ' इत्यदः ॥ २५३ ॥ स्मृत्वैतद्वचनं स्मृत्यो-त्खननायनिमुन्मनाः । ततो लेभे महारम्भा-देककं हेमटङ्ककम् ॥ २५४ ॥ ततो विशेषतोऽप्येष, विखिन्नात्ममनाः पुनः । गृहमागत्य सत्येन, तत् तत्पत्न्यै न्यवेदयत् ॥ २५५ ॥ सा तूत्तमस्वभावत्वात्, प्राप्तं प्रासन्यमन्यथम् । प्रियार्थं परमार्थं त्व-पक्त भक्तिमती सती ॥ २५६ ॥ अत्रान्तरे तयोर्गेहे, भोजनायोद्यतात्मनोः। मुनिः कोऽपि समायासी-न्मासक्षपणपारणी ॥२५७॥ दृष्ट्वा स भावनादृष्ट्या, प्रत्यलाभि

शुभाशयः। प्रतिलेभे मुनिः सोऽन्नं, धर्मलाभाशिषा तुषम् ॥२५८॥ गते मुनौ निजस्थानं, ताभ्यामित्यवधारितम्। अहो ! आवाभ्यामेतत् किं, क्षीरान्नं मुनये ददे ? ॥ २५९ ॥ प्राक् पश्चात्तापमाप्यान्तः, पुनर्भावः स्थिरो दधे। शुभाशुभस्वभावेना–ऽभवत् कर्म शुभाशुभम् ॥ २६० ॥ युग्मम् । धर्मं सम्यक् समाराध्य, तदनालोच्य किञ्चन । सौधर्मकल्पे जज्ञाते, तौ समेतौ सुरोत्तमौ ॥ २६१ ॥ तत्र चित्रो(त्रो)चितं सौख्य–मनुभूयोत्तरोत्तरम् । ततश्च्युत्वाऽवतीर्येह, मृगाङ्कस्त्वं भवेऽभवः ॥ २६२ ॥ त्वदीया दयिता जाता, सेयं पद्मावती बत । पुनः प्राग्जन्मसम्बद्धौ, भवन्तौ भवतः स्म तौ ॥ २६३ ॥ एवं भावविपर्यास–वृत्तं प्रवक्तृते द्वयोः भवन्तावभिजानीतां, तदिदं कर्मणः फलम् ॥ २६४ ॥ प्रतिबुद्धौ ततस्तौ तु, जातजातिस्मृती इव । शुद्धधर्मचिकीर्षार्थं, स्पृहयालूत्तमात्मकौ ॥ २६५ ॥ ततो गुरोर्गिराऽऽराध्य, श्रद्धाश्राद्धत्वमाप्य तौ । तदन्ये भद्रकोपज्ञा, जज्ञिरे श्रीजिनाज्ञया ॥ २६६ ॥ युग्मम् ॥ तद्भवे प्रतिपद्यापि, शुद्धधर्ममनश्वरम् । लेभिरेऽच्युतदेवत्व–मिन्द्रत्वाप्तसद्भ्रमम् ॥ २६७ ॥ च्युत्वा ततः पुनरवाप्य कुले सुजन्म, सन्मानवं सततसङ्गतबोधिबीजम् । कैवल्यमाप्य जिनधर्मगुरूपदिष्टं, प्राप्स्यन्ति मुक्तिकमलाममलामनन्ताम् ॥२६८॥

इति भाव–भावदानधर्मकर्मणि श्रीमृगाङ्ककथा ॥

हंसपाल–मृगाङ्कस्य, देशनाऽन्तः कथामिमाम् । भावे भावे निशम्याथ, प्रथमानस्ववासनम् ॥२६९॥ देशनान्ते तु धन्येन, मिलत्पाञ्जलिनाऽलिके । विज्ञप्तिर्विदधे साधो !, शोधिसद्बोधिसिद्धये ॥ २७० ॥ युग्मम् ॥ भगवन् ! कर्मणा केन, प्राक्तनेन दुरात्मना । भ्रातरोऽमी समीपस्था, दुःस्थास्ते मेऽप्रजा अपि ॥ २७१ ॥ व्यवसायकृतायासा, गुणवद्वणिजोऽन्वणु । न तादृग् धनमासेदु–र्मेदुरात् कर्मणः कुतः(दुरोदरपरा इव)? ॥२७२॥ सूरीन्द्रः प्राह निस्तन्द्र!,भो भद्र ! श्रूयतामथ। कथ्यमानं यथातथ्यं,त्वत्पृष्टस्योत्तरं वरम्

॥ २७३ ॥ एतैरादिभवे दानं, ददे यतिनि यत् परम् । मायाविर्भावविकलं, सकलं सत् कलङ्कहृत् ॥ २७४ ॥ तथाहि कथ्यते कथ्यं, श्रूयतां तद्धवान्तरम् । ग्रामे क्वापि पुराऽभूवन्, स्नेहेद्धा बान्धवास्त्रयः ॥ २७५॥ कुतश्चित् कर्मणः प्राच्या–दवाच्या ज्ञानिना विना । दारिद्र्यं नात्यजत् तत्कं, सदौकः स्नेहभागिव ॥ २७६ ॥ दारिद्र्यविद्रुतास्ते तु, हेतुकेतुनिराकृताः । प्रासादा इव निर्देवा– श्चकासन्ते न किञ्चन ॥ २७७ ॥ निर्द्रव्यो दीव्यति प्रायो, न च चञ्चापुमानिव । चञ्चाना तु विनोदाय, मुत्प्रमोदाय निर्धनः ॥ २७८ ॥ त्रयोऽपि भ्रातरस्ते हि, नेहितं क्वापि लेभिरे । काष्ठान्यानीय कष्टेन, चेष्टन्ते काननाननात् ॥ २७९ ॥ चतुष्पथे कथञ्चित् ते, काष्ठविक्रयनिक्रयाः । पोषयन्ति कुटुम्बं स्वं, ' विडम्बः खलु कर्मजः ' २८० ॥ काष्ठेभ्यस्तेऽन्यदा प्रापु–रर्वी स्फुटशम्बलाः । भरानाभृत्य तत्कृत्याद् , बभूवुश्च बुभुक्षवः ॥ २८१ ॥ सम्भूयाह्नाय मध्याह्ने, त्रयो भोक्तुमुपाविशन् । तरोरधस्तु कस्यापि, छायाश्रयमभीप्सवः ॥ २८२ ॥ युग्मम् ॥ तत्राप्यमात्रपुण्येना–रण्ये तेषां तु तस्थुषाम् । प्राप तापाम्बुदस्पन्दः, कन्दो धर्मतरोरिव ॥२८३॥ मासोपवाससंवासः, सदीर्यासमितिस्थितिः । पारणाकारणा[त्]श्रामः, क्षमासारमुनीश्वरः ॥२८४ ॥ युग्मम् ॥ मुनिमालोक्य तं वाक्य–प्रमोदामोदमेदुरम् । जहृषुस्ते प्रकर्षेण, कर्षुका इव वर्षणम् ॥ २८५ ॥ मुदमादधिरे दातुं, सामुदायिक- शम्बलम् । तेऽहम्पूर्विकया चेद–मदुस्तस्मै सदुत्सवम् ॥ २८६ ॥ तदादाय गते साधौ, समाधौ वा सुधानिधौ । कुमुदानीव ते भेजु–र्मानसङ्कोचशोच्यताम् ॥ २८७ ॥ पश्चात्तापमवापुश्चे–त्ययं लात्वाऽगमद् वृथा । कुतोऽकस्मादिहागाच्चा–ऽस्माकमातङ्कपङ्ककृत् ॥ २८८ ॥ न दायादो न सम्बन्धी, न गोत्री नात्र मैत्र्यवान् । न प्रातिवेश्मिकोऽस्माक–मस्मै तत् किं ददे तदा ? ॥ २८९ ॥ युग्मम् ॥ नायं निन्द्योऽथवा वन्द्यः, साधुर्माधुकरीं भ्रमन् । वयमेव पुनर्निन्द्या, येऽविमृश्य विधायिनः ॥ २९० ॥ सर्वे मुष्टाऽप्यटव

साधु–लिप्सासिन्धुरितोऽधुना । वयं मूर्खाः क्षुधा शुष्का, भविष्यामो मुधाऽबुधाः ॥ २९१ ॥ पश्चात्तापोपसन्तापा–स्ते ययुर्निज-
मन्दिरम् । तेन दानानुभावेन, किञ्चिच्च धनिनोऽभवन् ॥ २९२ ॥ भावादभावतो दानं, प्रायः पात्राय बोधये । ततः प्रदेयं तद्दानं,
दानाद् भावोऽपि (वि)भाव्यते ॥ २९३ ॥ कदाचिदन्यदा ते तु, पात्रे दत्त्वाऽशनादिकम् । सानुतापाः पुनश्चासन् , भवितव्यप्रतो-
दिताः ॥ २९४ ॥ पूर्ववत् तादृशं दानं, दत्त्वा पात्रेऽनुतप्य च । धर्ममाराध्य धिक्श्रद्धं, सुश्रद्धं वा पुनः क्वचित् ॥ २९५ ॥
पूर्णीकृत्य तदायुस्ते, वयोऽस्ते वार्धके गताः । तत्तादृशनिजोपात्त–धर्माधर्मद्वयाश्रयः ॥ २९६ ॥ स्वल्पर्द्धिव्यन्तरावास–मासेदुरु-
दयास्तदम् । ' व्युप्यते यादृशं क्षेत्रे, तादृशं फलमाप्यते ' ॥ २९७ ॥ व्यन्तरायुरपि श्रान्त्य, ततश्च्युत्वा यथाक्रमम् । भ्रातरस्ते
त्रयोऽभूवन् , भवतो भवतोऽत्र ते ॥ २९८ ॥ सुपात्रदानतः श्राद्ध–कुले ते धर्मसङ्कुले । त्रयः समुदपद्यन्त, विद्यमानास्तवाग्रजाः
॥ २९९ ॥ तत्तादृग्दान–भावाभ्या–मभ्यावृत्तिप्रवर्तितः । लक्ष्मीरेषामलक्ष्मीर्वा, विद्युद्दर्शनाशदा ॥ ३०० ॥ लक्ष्मीः कादम्बि-
नीवालं, लीयते च विलीयते । पूर्वोपात्ताघवातौघ–भावाभावेन भृस्पृशाम् ॥ ३०१ ॥ कादम्बिनीव कमला कमलाचलाऽलं,
सम्पद्यते सुखसमाश्रयसंश्रयाय । चेत् पूर्वकर्ममरुता स्फुरता नितान्त–मातन्यते भवता महता हताशम् ॥ ३०२ ॥ दानक्षेत्रधरा
शुभा सुरतडित–प्रोल्लासशश्वत्स्तुति–प्रत्युत्पन्नसद्दूर्जगर्जनमनः सत्केतका धान्यदः। भावाब्दोऽद्भुतश(स)स्यदः प्रतिपदं सम्पद्यते सम्पदे,
पश्चात्तापमरुच्च चेद् गुरुतरं दूरं निरस्यत्व तम् ॥३०३॥ येऽन्येऽपि दात्वा (दत्त्वा) मुनिपुङ्गवेभ्यो, दानं तु पश्चादनुतापमापन् । ते दुःख-
दौर्गत्यगतिं लभन्ते, यथैव धन्यस्य सदग्रजास्ते ॥ ३०४ ॥ "दानं देयं सद्यथाशक्ति युक्त्या, भावो भाव्यो नव्यनव्यो विभाव्य ।
पश्चात्तापो नैव कार्यो निवार्यो, यस्मात् सर्वं निष्फलं स्यादलं तत् ॥ ३०५ ॥ " उक्तं च—" दानं दत्त्वा ये मुनिभ्यस्तु पूर्वं,

पश्चात्तापं तन्वते पुण्यहीनाः । भाग्यादाप्तं यानपात्रं पयोधौ, त्यक्त्वा झम्पामापदे ते ददन्ते ॥ २०६ ॥ दानोत्थपुण्यं न तु भाग्यभर्ना, चिनोति भावेन हृदि प्ररूढम् । स भाग्यहीनः खलु योऽस्त्यभावः, 'क्षीरं न कुक्षौ शुनकस्य तिष्ठेत्' ॥ २०७ ॥ पश्चात्तापो नैव कार्यः कदाचिद्, दत्त्वा दानं दायकैः पुण्यपात्रे । किन्त्वभ्रान्तं दानकल्पद्रुमोऽयं, प्राज्ञन् सेच्यो भावपीयूषसेकैः ॥ ३०८ ॥ एवं धर्मे भावयुक्तिं विविक्ता, व्यक्तं कुर्युर्धैर्यमैश्वर्यधुर्याम् । प्रायो देहेऽन्नादिना वै न जग्धं, स्निग्धं पुष्टौ मन्मवेश्मान्यथेत्थम् ॥ ३०९ ॥ ५५मिव दरार्थसिद्धव्य.............रूपम्य वतितुमुदेवान्य............ । ज्यग्रर्चंद्रमार्कवकी घटनकरं नित्यंगासर्वं...जयति सतां शस्यत ववस्थम् (?)॥ ३१० ॥ एवं सद्भाव-दुर्भावां, तत्तद्भ्रातृत्रयीकथाम् । प्रकथ्यावस्थिते साधौ, धन्यपृच्छा यदृच्छया ॥ ३११ ॥ अथ विज्ञप्तिमातेने, विनयानम्रकम्रका । सुभद्रा भद्रभावार्द्रा, वल्लीव सुमनस्विनी ॥ ३१२ ॥ पप्रच्छ वत्सलं सूरि-पुङ्गवं रङ्गदुत्सवम् । शालिभद्रभगिन्याऽपि मया व्यूढाऽस्ति मृत् कुतः ? ॥ ३१३ ॥ प्राहुस्तां गुरवस्तेऽथ, शुभे ! शृणु भवं स्वकम् । यदर्जितं त्वया कर्म, मृत्तिकावहनावहम् ॥ ३१४ ॥ धन्योऽभवत् पुरा यद्वि, वत्सपालस्तु बालकः । चारयन् वत्सरूपाणि, निजवृत्तिविधित्सया ॥ ३१५ ॥ यूयं तदा चतस्रोऽस्य, प्रातिवेश्मिकतामिताः । सोमश्रीर्मनवी पुण्य-वती सौभाग्यमञ्जरी ॥ ३१६ ॥ धन्येन तेन तु क्वापि, वीक्ष्य क्षीरान्नलिप्सुना । प्रार्थिता जननी स्वीया, ययाचे भोजनं हि तत् ॥ ३१७ ॥ तदा तदपि पुत्राय, भक्तं दातुमनीश्वरी । रुरोद जननी तस्य, 'स्त्रीणां बालस्य तद् बलम्' ॥ ३१८ ॥ तदाकर्ण्य सकर्णास्ता, मिमिलुः प्रातिवेश्मिकाः । सदयाश्चाभवंस्तस्यां, तद्बाले च विशेषतः ॥ ३१९ ॥ तास्वतस्रोऽपि तत्काल-मालम्बित-दयारया[:]। तयोर्बभूवुर्भूयिष्ठ-कृपाः स्युरहि(?)सादृशः ॥ ३२० ॥ तास्वेकया ददे दुग्धं, स्निग्धं चित्तमिवोचितम् । तन्दुला ददिरे

शुभ्रा, गुणा वा च द्वितीयया ॥ २२१ ॥ खण्डश्चाखण्डमाधुर्यो–ऽदायि ताभ्यां तृतीयया । प्राज्यमाज्यं चतुर्थ्या च, व्यतीर्यत हितोर्जितम् ॥ २२२ ॥ इत्येताभिरि[illegible]–रसानुविरसामरम् । [illegible]समायोगाद्, भोगभृत् कर्म निर्ममे ॥ २२३ ॥ "एवं यो यत्र कुत्रापि, प्रस्तावौचित्यकृत्यवित् । दत्ते दानं मुदादानं, स स्यात् सर्वत्र भोगभृः" ॥ २२४ ॥ हे सुभद्रे ! त्वया भद्रे !, यन्मृद्वहनकर्म तत् । न्यबन्ध्यबन्धुरे किञ्चित्, तदाप्यथ शृणु प्रथम् ॥ २२५ ॥ निर्वहन्ती वहन्ती च, काचिद् दासी तु गोमयम् । व्यजिज्ञपत् त्रपापात्रा, किञ्चित् स्वामिभ्यसप्रियाम् ॥ २२६ ॥ त्वं तु प्रायः कृपापात्रा, सदा तां कर्मयोगतः । सतिरस्कार-संस्कारमञ्जरीरिति निष्ठुरम् ॥ २२७ ॥ हे दासि ! कृतकर्माभि–र्भारं वहसि काऽसि च ? । तत् तदेव कुरुत्वालं, मौनमालम्ब्य सद्वलम् ॥ २२८ ॥ तेन सा वचसा दूनाऽऽधूना वाऽभक्ष्यभक्षणात् । तस्थुष्यधोमुखीभूय, भूयो भूयो हृदापदा ॥ २२९ ॥ " किं करोति नरः प्रायः, पारतन्त्र्यनियन्त्रितः ? । नरकं प्राहुरेवार्याः, पारतन्त्र्यमयन्त्रितम् ॥ २३० ॥ " तेनानालोचितार्थेन, निदाघेनेव वल्लिका । शालिभद्रानुजाऽपि च, वाहिता हन्त ! मृत्तिकाम् ॥ २३१ ॥ " समर्थो वाऽसमर्थो वा, गर्वसर्वस्वपर्वतः । साहङ्कारो नरः कर्म, चिनोति ननु नीचकैः ॥ २३२ ॥ ततो धर्मार्थिभिः किं वा, कर्मार्थिभिरिहोत्तमैः । वचनेनाप्यहङ्कारः, कर्तव्यो न मनीषिभिः ॥ २३३ ॥ " निशम्येति गिरं सूरे–र्निरस्तस्वान्तसंशयाः । विनम्य च गुरुं तेऽथा–भूवन् वेश्म–यियासवः ॥ २३४ ॥ इत्येवं संशयाद्रिं विषमतमगतिं मोहमालानुकूलं, भित्त्वा छित्त्वा च सम्यग् जिनवचनलसद्देशना–पव्युपास्त्या । जात्याख्यानविधानाः स्थिरवति महति श्रीगुरावेिन्द्रभद्रे, धन्याद्या भाविभद्रा निजनिजसदनान्यपुरासप्रबोधाः ॥ २३५ ॥ धन्याख्यानमिदं विदग्धसुहृदः श्रुत्वा गुरोरादितः श्रीकीर्त्युत्तमसागरात् सुमनसामानन्दकन्दाम्बु-

दा: । भव्याः श्रीजिनधर्मशर्मकमलामालिङ्ग्य संसर्गतो, योग्या जिष्णुमनोरथाः पृथुपथा जग्मुर्जयानन्दताम् ॥ २३६ ॥ आश्चर्यधैर्यवर्योर्जितसुकृतकृतः कान्तकान्ताभिरामः, कामोद्दामप्रधानः सुभगशुभगतेर्भोगभोगीन्द्रभद्रः । निस्तन्द्रः श्रीसमुद्रः सुषमसुसमयं कालमालम्बमानो, धन्यः पुण्यप्रभावादभवदतिधनी सौख्यनीतिप्रणीतिः ॥ २३७ ॥ यथा यथावद्गुणराजिराज्य–विभ्राज्यमानस्य मनस्यवश्यम् । वैराग्यसङ्गः समगंस्त शस्तः, प्रियासुभद्राऽश्रुविलोकनेन ॥ २३८ ॥ श्रुत्वा तदास्यादतिवश्यशस्य–श्रीशालिभद्रस्य विरागभावम् । तस्यापि स्वेन सदैव दैवादूरीचकार व्रतभारमारात् ॥ २३९ ॥ तत् सर्वमुर्वीमवितुप्रसिद्ध–श्रीशालिभद्रस्य कथाप्रबन्धात् । ज्ञेयं तु विज्ञैरिति भूरिभावं, विभावनीयं च शिवाय भूयः ॥ २४० ॥ व्रतदानात् पश्चाच्चरमजिननाथादवितथं, द्वयोः साध्वोर्धन्याभिधसुविधिशाल्योरनुकलम् । क्रियाकाण्डं चण्डं सदशमभवद् भावविभव–प्रभावप्राग्भारात् तदखिलसुखायास्तु सुधियाम् ॥ २४१ ॥ किञ्चित् प्राच्यं सुवाच्यं किमपि नवमदो मोददं संविदाद्यं, किञ्चिज्ज्ञात्वा गुरूणामनणुगुणिमुखात् संमुखादागमोक्तेः । क्लृप्तं विज्ञप्तिरूपं निरुपमिति तयोः साधु साध्वोः प्रबोधात्, खेन्द्विष्विन्द्वाख्यवर्षे[१५१०] बहुलशुदिरविश्रित्रयोदश्याम् ॥ २४२ ॥ श्रीवज्रशाखासुखसान्द्रचान्द्र–कुले विशालेऽस्ति सुधर्मनाम्नः । श्रीवर्धमानान्वयवंशरत्नं, जिनेश्वरः सूरिरभूत् प्रभाभूः ॥ २४३ ॥ श्रीविक्रमार्कान्नृपतेः पयोधि–द्वि-खेन्दुवर्षे[१०२४?]ऽणहिलाह्वपुर्याम् । श्रीदुर्लभाधीशसदस्युदारं, दधे, विधिं खारतराख्यमुख्यम् ॥ २४४ ॥ बभूव तस्माज्जिनचन्द्रसूरि–पट्टोत्कटाभोऽभयदेवसूरिः । नवाङ्गवृत्तिर्विवृतेस्ततान, यः सर्वशोभां जिनशासनाङ्गाम् ॥ २४५ ॥ तदीयपट्टोदयभूधराग्र–सहस्ररश्मिस्तमसां प्रणाशी क्रियाप्रधानाद्भुतधीनिधीशः, सूरीश्वरः श्रीजिनवल्लभाह्वः ॥ २४६ ॥ ततो बभूवाप्रतिमो नवोधदुर्योगीन्द्रचूडामणिरस्ततन्द्रः ।

युगप्रधानो धरणेन्द्रदत्तो, वरो वरीयान् जिनदत्तसूरिः ॥ ३४७ ॥ तस्यानुजः(गः) श्रीजिनचन्द्रसूरि–स्तत्पट्टभूभृज्जिनपत्तिसूरिः । पदे तदीयेऽभ्युदयाय भूरि–र्जिनेश्वरः सूरिगुरुर्बभूव ॥ ३४८ ॥ जिनप्रबोधोऽपि तदाप्तबोधो, वादीन्द्रमुद्रादिसमुद्रचन्द्रः । ततोऽपि च श्रीजिनचन्द्रसूरि–स्तस्माज्जिनाग्रे कुशलस्तु सूरिः ॥ ३४९ ॥ जज्ञे ततः श्रीजिनपद्मसूरि–रस्मात् सलब्धिर्जिनलब्धिसूरिः । तदग्रतः श्रीजिनचन्द्रसूरिर्जिनेश्वरः सूरिरितः प्रतापी ॥ ३५० ॥ ततोऽपि च श्रीजिनशेखराख्य–स्ततोऽस्ति स श्रीजिनधर्मसूरिः । प्रज्ञाप्रकर्षाद्श्रुतदेवसूरिः, सौजन्यपुण्यादिगुणांशुसूरिः ॥ ३५१ ॥ तदीयपादाम्बुजराजहंसः श्रीकीर्तिसत्सागरसूरिशिष्यः । आचार्यमिश्राप्तपदानुसारी, सूरिर्जयानन्दसदाख्यया गुरु ॥ ३५२ ॥ पारस्कराख्ये नगरे गरीयः–श्रीगूडरार्दाश्वरतीर्थसारे । श्रीवीर–पार्श्वाजितचैत्यचित्रे, व्यधायि धन्यस्य चरित्रमेवम् ॥ ३५३ ॥ इति धन्यमहापुण्य–नररत्नशिरोमणेः । जिनधर्म–जयानन्दः, प्रस्तावः पञ्चमोऽस्त्वयम् ॥ ३५४ ॥

इति श्रीधन्यचरित्रे सद्गुरुप्राप्ति–भावाभावदानमृगाङ्ककथाकथनश्रवण–पूर्वभवसन्देहापोह–धर्मरङ्ग–वैराग्यरङ्गलाभादिवर्णनो नाम पञ्चमः प्रस्तावः सम्पूर्णः ॥ ५ ॥

[धन्यचरित्र-कथाकृत्-प्रशस्तिः—]

वामेयमीशमनिशं मनसा नमामि, वाचा तथैव वपुषः प्रभया भजामि। श्रीनिश्चलं सुखपुषं शरणागतानां, श्रीशं विशेषसुषमासुषमं गुणानाम् ॥१॥ पार्श्वदेव ! वरं देहि, पावनेशं सदैव हि । भावशश्वमतानेक-भावसद्भव्यमोदकम् ॥२॥ वृद्धलघुच्छत्रयुग्मम् ।

वर्षे ख-विधु-बाणेन्दु [१५१०] सम्मिते मासि मार्गवे (के) । शुदिद्वितीया-गुर्वाख्यवारेऽलेखीदमद्भुतम् ॥ १ ॥ श्रीमद्गूर्जरत्रकरे फग्गु- कोट्टे श्रीसङ्घसत्कुले । श्रीएकोनांस्यश्रीभीम-राज्ये प्राज्ये श्रिया श्रिया ॥१॥ श्रीमत्खरतराह्वान-गच्छे स्वच्छश्रियाऽऽश्रिते । श्रीजिनचन्द्रसूरीन्द्र-सन्ताने साधुवन्धुरे ॥ २ ॥ श्रीजिनेश्वरसूरीशा-पदेऽभूज्जिनशेखरः । तत्पट्टे प्रकटाः सन्ति, श्रीजिनधर्मसूरयः ॥ ३ ॥ तत्पादपद्महंसेना-चार्येण विधुपक्षिणा । जयानन्देन श्रीपार्श्व-प्रसादाल्लिखितं मुदे ॥ ४ ॥ यावद् धरा सुरधरः सरविर्विधुश्च, तारागणो ध्रुवनिबद्धगतिः सदाऽस्ति । स्वर्भूर्भुवस्त्रयमिदं किल यावदेव, श्रीपार्श्वचैत्यमपि नन्दतु तावदेव ॥ ५ ॥ अस्मिश्चैत्यवरे सुरेश्वरनतश्रीपार्श्वतीर्थोत्तरे, श्रीसङ्घेन चतुर्विधेन सुजनैरन्यैरपि प्राञ्जलैः । कार्या शुद्धिरधीश्वरी शुभकरी पूजा नतिश्चोन्नतिः, सर्वश्रीसमुदायिभिः खरतरैरैक्यं विलोक्यं श्रिये ॥ ६ ॥

इति प्रशस्तिः ।

[प्राचप्रतिप्रान्तोल्लेखः]

संवत् १५४८वर्षे श्रावणसुदित्रयोदशीसोमे श्रीखरतरगच्छे श्रीजिनेश्वरसूरिसन्ताने श्रीजिनधर्मसूरिपट्टालङ्कारचूडामणि-श्रीजिनचन्द्रसूरिवराणां वाचनाय पं० कीर्त्तिहंसमुनिना श्रीधनाढ्यगुणचित्रं चरित्रमलेखि श्रीजेसलमेरुमहादुर्गे चिरं नन्दतु ॥

न मुञ्चन्ते चेतः प्रतिदिवसमस्माकमखिलं, गुणा यौष्माकीनाः शशिकिरणसंवादनिपुणाः ।
न यौष्माकीनं नाम प्रतिदिनमनुत्कीर्त्य नियतं, स्वचित्ते विन्दामः कथमपि समाधानघटनम् ॥ १ ॥

इति गुणगणोदारश्रीधन्यसाधुचरित्रमिदम् ॥

समाप्तम्

सूरीश्वरो विजयते सुकृपादिचन्द्रः, शिष्योऽस्ति तस्य सुखसागरपाठको यः ।
तस्याऽऽज्ञया लिखितवान् सुरते सुरम्यां, सुश्रावको विजयचन्द्र इमां प्रतिं तु ॥ १ ॥

संवत् १९९२ वर्षे प्रथमभाद्रपदे पर्युषणपर्वान्तर्गतश्रीमहावीरजन्मवाचन—महोत्सवदिने
पूर्णीकृतेयं लिखित्वा श्रावकविजयचन्द्रेण । शुभं भवतु ॥

सुभाषित–विषय–सूची।

विषयः	प्रस्तावे	पद्यक्रमाङ्कः	पृष्ठे
अच्छन्नाः	५	१६०	२९
अज्ञाः	४	१४९	२२
अधमाः	३	२९	११
अघोदशाः	५	१५३	२९
अन्नम्	१	२८	२
अर्थेच्छा	२	७८	६
अविरोधः	४	२०८	२४
अविश्वासः	२	१३२	७
असाम्प्रतम्	४	८२	२०
अहङ्कारः	५	३३२–३३३	३४
आपन्नाश्रयः	३	१५	११
आहार–शुद्धिः	३	१२७	१४
औदरिकः	५	३५	२६
कर्म	४	८४, २०१–२०२	२०, २४
—	५	२८०	३३
—बलवत्ता	३	१४१–१४५, १५३	१४, १५
कर्म–भोगः	१	८०	३
काम–भावाः	२	२१०	९
कामः	५	८५–८७	२७
कीर्तनम्	३	८१, ८४	१३
कीर्तिः	२	१३९	७

विषयः	प्रस्तावे	पद्यक्रमाङ्कः	पृष्ठे
कुपुमान्	१	१९	१
कुलाङ्गना–धर्मः	३	१०५, ११०–१११	१३
———	३	२३१–२३२	१७
———	५	५०—५१	२६
कुलीनः	२	१५६	८
कुस्त्री	३	११२	१३
—	४	१०९–१११	२१
कूटम्	२	१३१	७
कृपणः	२	८८–१०५	६
——धनम्	२	१०९-११०–११६-११७	६, ७
——	३	२०१–२०२	१६
क्रोधः	५	१११	२८
क्रोधी	२	१७१	८
क्रोधी	५	७०	२६
खलाः	२	१६६	८
——	४	१९८	२४
——	५	९१	२७
गाम्भीर्यम्	१	६९	३
गुणाः	२	४१, ४२	४–५
—	२	४४, ५१, ५४	५
—	३	५९	१२
गुणि–गौरवम्	३	६०	१२
गुणिनः	२	५२–५३	५
——	२	६५	५
चित्त–नयने	५	२००	३०

विषयः	प्रस्तावे	पद्यक्रमाङ्कः	पृष्ठे
जाति–पोषः	४	१७६	२३
जिन–धर्मः	१	१	१
त्याज्यम्	२	१७२–१७३	८
दया	१	३५	२
दयालुः	१	३६	२
दानम्	२	२	३
———	१	५	१
———	३	७३–७४	१२
———	४	४	१८
——— (आदरेण)	३	१९२	१६
——— (पात्रे)	१	८	१
———	२	२२५	१०
———	५	२२	२५
–(पश्चात्तापरहितम्)	५	३०३–३०८	३३–३४
दानाप्रकाशः(छद्मधर्मः)	१	७१–७२	३
दानी	१	१२	१
दाने दुर्लभम्	१	५३, ५८	२
दारिद्र्यम्	३	८७–८८, १७१	१३
———	३	९१	१५
———	५	२७७	३३
दुर्जनः	२	१५३	८
दुर्वचः	५	३६, ४३	२५
देशाः	३	१२४	१४
———	४	१५३	२२
देशान्तरम्	३	२२४	१७
दैवम्	४	१६६	२३

विषयः	प्रस्तावे	पद्यक्रमाङ्कः	पृष्ठे
दैवम्	५	९८	२७
——बलवत्ता	३	१५८, २१७	१५, १७
दौर्गत्य–शत्रवः	३	११८	१४
——	२	७९	६
द्रम्माः	५	११६	२८
धनम्	२	११६–११७	७
——	३	१३, १०९–११०	११
——महत्ता	३	१२९–१३१	१४
——	३	९१	१३
——स्थानम्	५	२५३	३२
धन्यजनः	२	१९४	९
धरा–वीक्षणम्	३	४६	११
धर्मः	१	२–४, ७८	१, ३
धर्मः	५	१११	२८
—	४	१४१	२२
—(चतुर्विधः)	५	१६–१८	२५
—	२, ३	२	९, १०
धार्मिकः	१	१३	१
धूर्ताः	५	१४९, १५२	२९
नन्दनाः	२	१२३	७
नराभासाः	४	१८९	२३
नारी	४	१०९–१११	२१
निर्गुणाः	२	५१–५२	५
निर्धनता	३	९९,१०१,१२९,१३१	१३
——	५	२७८	३३
निर्भाग्याः	३	३५	११

विषयः	प्रस्तावे	पद्यक्रमाङ्कः	पृष्ठे
निर्भाग्याः	४	१२०–१२१	२१
निःस्पृहाः	४	१८८	२३
पतिव्रता	३	२२५–२२६	१७
——	५	४८	२६
पर–पीडा–परित्यागः	२	१७४	८
परपीडाऽज्ञाः	१	३१	२
परस्त्री	४	२३	१९
परीक्षितम्	२	५८–५९	५
परीक्ष्याः	४	११३	२१
पारतन्त्र्यम्	४	९९	२१
—	५	२०६	३०
——	५	३३०	३४
पुण्यम्	४	३	१८
—	२	३६, ३७	४
पुत्र–पुत्री–पाठनम्	५	२५, २७	२५
पुत्रः	२	२०, ४७	४–७
प्रणामः (अष्टाङ्गः)	५	१२	२५
प्रधान–रक्षणम्, सेवा	३	९४–९५	१३
प्रियश्रुतिः	२	२१०	९
बन्धुः		१९०	
बन्धु–पार्थक्यम्	४	१८०	२३
बलम्	४	२९	१९
——	५	३१८	३४
बुद्धिः	२	१३९, १४१, १४२	७
—	५	१२३	२८

विषयः	प्रस्तावे	पद्यक्रमाङ्कः	पृष्ठे
बुद्धिमन्तः	२	१४२	७
भाग्य–भङ्गः	४	१२०–१२१	२१
—	४	१५१, १५५	२२
भाग्यभाजः	२	१४८, १७९–१८१	८
भुक्तम्	१	७४	३
भोगि–भोगः	२	१९९	९
मनः	२	११४–११५	७
मर्यादा–भङ्गः	४	२४	१९
माता–पितरौ	५	२५, २७	२५
मृत–जीवितम्	३	८१	१३
राजाशीः	४	५२–५३	१९

विषयः	प्रस्तावे	पद्यक्रमाङ्कः	पृष्ठे
लक्ष्मीः	२	४, १३९	३, ७
——साफल्यम्	४	१७५	२३
—	५	१६१	२९
—	५	२००–२	३३
वचन–पालकाः	३	६८, ६९	१२
वणिक्–क्रमः	३	७८	१२
वधू–वरौ	२	१६१–१६२	८
वाञ्छित–श्रुतिः	२	१३०	७
वाणिज्यम्	२	४	३
—	३	१२६–१२८	१४
विज्ञानम्	५	१११, ११५	२८
विद्या	२	१३९	७
— दानम्	५	१२४	२८

विषयः	प्रस्तावे	पद्यक्रमाङ्कः	पृष्ठे	विषयः	प्रस्तावे	पद्यक्रमाङ्कः	पृष्ठे
विद्या–चलिनः	५	१३७	२८	सज्जनाः	३	२१, २२, ६५	११, १२
विद्योपायाः	२	३३	४	—	२	१५३	८
विनयः	२	४२	४	—	४	१०६,१७०,१९८	२१,२३,२४
विरोधः	३	२२१	१७	—	५	९०, १०५	२७
विवाहः	२	२१६	१०	—	५	१६१	२९
व्यवसायी	४	१६०	२३	सञ्जीह्वा	३	१७७	१५
व्यवहारः	२	६३, ६५	५	सती–सत्त्वम्	३	२३३–२३५, २३८	१७
——शुद्धिः	३	१२७	१४	सत्परीक्षा	३	२४३	१७
शुभाशुभम्	२	१५०	८	सत्पुरुषः	१	१९	१
श्रुतिप्रियाः	२	२११	९	सत्यम्	१	३८–३९	२
श्लाघ्यम्	३	२००, २०१	१६	समयोचितम्	३	१६६–१६७	१५
सच्चरित्राः		१८८		समुदायः (सङ्गताः)	५	२३४, २३५	३१
सज्जनाः	१	३७	२	सम्पदः	२	७३	५

विषयः	प्रस्तावे	पद्यक्रमाङ्कः	पृष्ठे
सहोदरः	३	१७	११
साहसिकाः	५	१०७	२८
सुसंयोगः	३	११४,१६१–१६२	१४
सुखी	३	११२	१३
—	२	६	३
— (भावपूजा)	५	७४	२७
सेवा	४	२७	१९
सौख्यानि (सप्त)	४	२	१८
—	५	१–२	२४
स्त्रीचरित्रम्	५	१४०	२९
स्त्रीषु मार्दवम्	५	१७१–२	२९
स्वजनः	३	१५	११

पत्रेषु

चतुर्थः प्रस्तावः। पद्यानि २१४ — १८–२४

स्वकुटुम्बमिलनम्
भ्रातृजाया–परीक्षणम्
भ्रातृ–ग्रामपञ्चशतीदानम्
पुना राजगृहप्राप्तिः
चतुरिभ्यसुतापरिणयनम्
पुनर्भ्रातृसमागमः
विरोध–निरोधः
एकत्र स्थानम्
धर्म–करणम्

पत्रेषु

पञ्चमः प्रस्तावः। पद्यानि ३५४ — २४–३४

सद्गुरु–प्राप्तिः
भावाभावदानम्
ऐक्ये पञ्चाङ्गुलि–निदर्शनम्
मृगाङ्ककथा–कथनश्रवणम्
पूर्वभवः
सन्देहापोहः
धर्मरङ्गः
वैराग्य–रङ्ग–लाभादिवर्णनम्

ग्रन्थकृत्प्रशस्तिः — ३६

विषयानुक्रमः

	पत्रेषु
विषयानुक्रमः	२
सुभाषित-विषयसूची	३–६
प्रस्तावना	७–१६
प्रथमः प्रस्तावः। पद्यानि ८५	१–२
पूर्वभवपरमान्नदान-पुण्यार्जनम्।	
द्वितीयः प्रस्तावः। पद्यानि २२१	३–१०
सुकुलावतार-जन्म	
यौवनावसरः	
विदेश-प्रचारः	
राजगृह-प्राप्तिः	
विवाह-लाभः	
भोग-संयोगादि	

	पत्रेषु
तृतीयः प्रस्तावः। पद्यानि २५६	१०–१८
स्वकर्मपरीक्षार्थकौशाम्बीप्राप्तिः	
रत्न-परीक्षा	
राज्याङ्ग-प्राप्तिः	
राजपुत्री-परिणयनम्	
स्वकुटुम्बमिलनम्	
सुभद्रोपलक्षणोपाख्यानम्	